# प्रारूपम्

# राष्ट्रियशिक्षानीतिः 2019

# सारः

**प्रारूपम्-राष्ट्रियशिक्षानीतेः समितिः**

**अध्यक्षः**

के कस्तूरीरंगन् अध्यक्षचरः, भारतीयान्तरिक्षानुसन्धानसंघटनम्, बंगलुरुः (इसरो)

**सदस्याः**

(क) वसुधा कामत, कुलपतिचरः, एस्.एन्.डी.टी- महिलाविश्वविद्यालयः, मुम्बई

(ख) मंजुलभार्गवः आर्-ब्रैंडन-फ्राड् (गणितम्) प्रिंसटनविश्वविद्यालयः, यू.एस्.ए.

(ग) रामशंकरकुरीलः संस्थापककुलपतिचरः, बाबासाहेब-अंबेडकरसामाजिकविज्ञानविश्वविद्यालयः, मध्यप्रदेशः

(घ) टी.वी. कट्टमनी कुलपतिः इंदिरागांधीराष्ट्रियजनजातीयविश्वविद्यालयः, अमरकंटकम्, मध्यप्रदेशः

(ङ) कृष्णमोहनत्रिपाठी, शिक्षानिदेशकः, (माध्यमिकी) अध्यक्षचरश्च माध्यमिकशिक्षापरिषद् उत्तरप्रदेशः

(च) मजहर-आसिकः, प्रोफेसर, फारसी मध्य-एशियाई-अध्ययन-केन्द्रं भाषाविद्यालयः च, साहित्यं संस्कृति-अध्ययनं च, जवाहरलालनेहरुविश्वविद्यालयः नवदेहली

(छ) एम.के.श्रीधरः, सदस्यसचिवचरः, कर्नाटकज्ञान-आयोगः, बेगलूरुः कर्णाटकम्

**सचिवः**

(ज) शकीला टी. शम्सूः विशेषकार्याधिकारी(राष्ट्रियशिक्षानीतिः) उच्चशिक्षाविभागः, मानवसंसाधनविकास-मन्त्रालयः भारतसर्वकारः नवदेहली

**प्रारूपसमितेः सदस्याः**

(क) मंजुलभार्गवः, आर्. ब्रैडंन फ्राड, प्रोफेसरः गणितम्, प्रिंस्टनविश्वविद्यालयः, यू.एस्.ए.

(ख) के. रामचन्द्रन, परामर्शकः, राष्ट्रियशैक्षिकयोजना प्रशासनसंस्थानं च, नवदेहली

(ग) अनुरागबेहरः, सी.ई.ओ., अजीमफाउण्डेशन, कुलपतिः अज़ीमप्रेमजीविश्वविद्यालयश्चः, बेगलूरुः

(घ) लीनाचंद्रन्वाडिया, निरीक्षकः, अनुसंधानसंघटनम्, मुम्बई

## दृष्टिः

राष्ट्रियशिक्षानीतिः 2019 भारताधारितशिक्षाव्यवस्थायाः विमर्शं करोति,या सर्वेभ्यः उच्चगुणवत्तापूर्णशिक्षां प्रदाय अमुं देशं निरन्तरं न्याययुक्ते अनुप्राणिते ज्ञानपूरितसमाजे च परिवर्त्य प्रत्यक्षरूपेण योगदानं ददाति।

# नीते: अवलोकनाय मुख्यबिन्दव:

## I. विद्यालयीय-शिक्षा (School Education)

क. प्रारम्भिकबाल्यावस्थाया: शिक्षानीति: - आरम्भिकवर्षाणां महत्त्वोपरि बलं ददाति। अस्या: उद्देश्यं 2025 पर्यन्तं 3-6 वर्षस्थेभ्य: बालकेभ्य: गुणवत्तापूरितबाल्यावस्थाया: निरीक्षणं, शिक्षाया: सुनिश्चितीकरणं च। यत्र प्रभूत: विनिवेश: नूतन: आरम्भश्च कृत: वर्तते।

ख. आधारभूता साक्षरता संख्याज्ञानं च :- प्रथमकक्षात: पञ्चकक्षापर्यन्तं प्रारम्भिकभाषायां गणितस्य च उपरि विशिष्टं ध्यानं दातव्यं भविष्यति। नीते: उद्देश्यम् अस्ति यत् इदं सुनिश्चितं करणीयं यत् प्रत्येकं विद्यार्थी 2025-पर्यन्तं आधारभूतसाक्षरतां संख्याज्ञानं च अवाप्नुयात्।

ग. पाठ्यचर्या शिक्षाशास्त्रं च :- मस्तिष्कविकासाय शिक्षणाय च अधिगमसिद्धान्तानाम् आधारेण विद्यालयीयशिक्षाया: कृते एका नूतना विकासयुक्ता पाठ्यचर्या शैक्षणिकसंरचना च वर्तते,या 5+3+3+4 प्रारूपाधारेण विकासिता। विद्यालये व्यावसायिकधाराया: शैक्षणिकधाराया: च एकीकरणेन सह विज्ञानम्, सामाजिकविज्ञानम्, कला, भाषा, कीड़ा, गणितम् इत्यादीनां सर्वेषां विषयाणाम् उपरि समानरूपेण बलं देयम्।

घ. सार्वभौमिकी गति: :- नीते: उद्देश्यम् वर्तते यत् विविधोपायानां माध्यमेन 2030वर्षपर्यन्तं संपूर्णविद्यालयीयशिक्षाया: कृते 100% सकलनामांकनानुपातप्राप्ति: कर्तव्या:।

ङ. समाना समावेशिनी शिक्षा च, नीतौ इदं निश्चेतुं अनेके प्रयासा: सन्ति कश्चिदपि बालक: जन्माधारेण पृष्ठभूमे: आधारेण च अधिगमनाय उत्कृष्टाप्राप्त्यर्थं च अवसरादपि वञ्चितो न भवेत्। अस्मिन् ध्यानं दातुं विशेषशिक्षाक्षेत्रस्यापि निर्माणं भविष्यति।

च. शिक्षका: :- प्रबलपारदर्शिप्रक्रियामाध्यमेन शिक्षकाणां नियुक्ति: भविष्यति, पदोन्नति: च योग्यताधारेण भविष्यति। बहुस्त्रोतावधिकं प्रदर्शनं मूल्याकंन च भविष्यति, अपि च शैक्षिकप्रशासकं शिक्षकप्रशिक्षणं च भवितुं प्रगतिपथ: उपलब्ध: भविष्यति।

छ. विद्यालयीयप्रशासनम् :- विद्यालया: विद्यालयपरिसरेषु (दशत: विंशतिपर्यन्तं सार्वजनिकविद्यालया:) व्यवस्थिता: भविष्यन्ति एते शासनस्य प्रशासनस्य च प्रधानभाग: भविष्यन्ति। स्र्वाणि संसाधनानि उपलब्धानि भवेयु: इति सुनिश्चितेव्यम्, यथा आधारभूतसंरचना, शैक्षणिकं (यथा पुस्तकालय:) जनाश्च (यथा कलासंगीतशिक्षका:) एते प्रबला: शिक्षकसमुदाया: भविष्यन्ति।

ज. विद्यालयानां विनियमनम् : हितानां परस्परं संघर्षणसमाप्तये पृथक्-पृथक् निकायद्वारा विद्यालयानां विनियमनं संचालनं च भविष्यति। नीतिनिर्माणं विनियमनम्, संचालनं, शैक्षणिकविषयाणां कृते च स्पष्टा पृथक्-पृथक् व्यवस्था च भविष्यति।

## II. उच्चतरशिक्षा (Higher Education)

क. नूतनं प्रारूपं : उच्चतरशिक्षार्थं एकस्या: नूतनाया: दृष्टे: प्रारूपस्य च परिकल्पना विपुलव्यवस्थितजीवद्-बहुविषय-संस्थानै: सह कृता वर्तते, सम्प्रति अष्टशतं (800) विश्वविद्यालया: चत्वारिंशत् सहस्त्रं (40000) महाविद्यालया: पञ्चदशसहस्त्रं (15000) प्रायश: उत्कृष्टसंस्थानेषु समावेक्ष्यन्ते।

ख. व्यापकशिक्षा (Liberal) : विज्ञान-कला-मानविकी-गणिता-इत्यादीनां व्यावसायिकक्षेत्राणां च कृते एकीकृत। गहनावसरार्थं, स्नातकस्तरेषु एका व्यापिनी कलाशिक्षा स्थापयिष्यते। एतासु कल्पनाशीलाया: नातिकठिनाया: पाठ्यसंरचनाया:, अध्ययनस्य च रचनात्मकं संयोजनं, व्यावसायिकशिक्षाया: एकीकरणं च इति अनेके प्रवेशबिन्दव: निर्गमबिन्दव: च भविष्यन्ति।

ग. शासनम् : संस्थागतं शासनं शैक्षणिकं प्रशासनिकं च वित्तीयस्वायत्ततायां आधारितं भविष्यति, प्रत्येकं उच्चतरशिक्षासंस्थानं एकेन स्वतन्त्रेण मण्डलेन शासितं भविष्यति।

घ. विनियमनम् : वित्तीयसत्यनिष्ठां जनोत्साहं च निश्चेतुं विनियमनं अल्पप्रयाससाध्यं प्रभावकारी च (light but tight) भवेत्। हितानां संघर्षणं समापयितुं मानकव्यवस्थाया: वित्तपोषणस्य प्रत्यायनस्य विनियमनस्य च संचालनं भविष्यति स्वतन्त्रनिकायेन:।

## III. शिक्षकशिक्षा (Teacher Education)

शिक्षकस्य सज्जीकरणकार्यक्रमा: गहना: भविष्यन्ति, इयं प्रक्रिया स्पन्दित-बहुविषयिकासु उच्चतरसंस्थासु भविष्यति। बहुविषयकसंस्थासु दीयमाना चतुर्वर्षीया एकीकृतचरण-विशिष्टा, विषयविशिष्टा स्नातकशिक्षा च (बैचलर् ऑफ् एजुकेशन्) कुशलाध्यापकं भरचयितुं प्रमुखा प्रकल्पा भविष्यति। निम्नस्तरीया: निष्क्रिया: अध्यापका: शिक्षणसंस्थानानि च बहिष्कृतानि पिहितानि च भविष्यन्ति।

## IV. व्यावसायिकशिक्षा (Professional Education)

सम्पूर्णा व्यावसायिकशिक्षा उच्चतरशिक्षाव्यवस्थाया: एकम् अभिन्नम् अङ्गं भविष्यति। केवलं प्रविधिनिष्ठ: प्रौद्योगिकीविश्वविद्यालय: स्वास्थ्यविज्ञानविश्वविद्यालय: विधिविश्वविद्यालय: कृषिविश्वविद्यालयश्च एतेषु क्षेत्रेषु अन्यक्षेत्रेषु वा संस्थानानि पिहितानि भविष्यन्ति।

**V. वृत्तिपरकशिक्षा (Vocational Education)**

इयं सम्पूर्णशिक्षाया: एकम् अभिन्नम् अङ्गं भविष्यति। अस्या: नीते: उद्देश्यं 2025वर्षपर्यन्तं सर्वेषां शिक्षार्थिनां न्यूनातिन्यूनं 50% पञ्चाशत्प्रतिशतमिता: शिक्षार्थिन: व्यावसायिकशिक्षां प्राप्नुवन्तु इति निश्चेतव्य।

**VI. राष्ट्रियानुसन्धानसंस्था (National Research Foundation)**

सम्पूर्णदेशे अनुसंधानं नवाचारं च प्रेरयितुं विस्तारयितुं च एकं नूतनं एकांशं स्थापयिष्यते।

**VII. शिक्षायां प्रौद्यौगिकी (Technology in Education)**

अस्या: नीते: लक्ष्यं वर्तते यत् कक्षाप्रक्रियां समुन्नेतुं शिक्षकव्यावसायिकविकाससमर्थनाय वंचितसमूहानां कृते शैक्षिकाभिवृद्धय शैक्षिकयोजनां प्रशासनं प्रबंधनं च संवर्धायितुं शिक्षाया: सर्वेषु स्तरेषु प्रौद्योगिक्या: एकीकरणं कर्तव्यम्।

**VIII. प्रौढशिक्षा (Adult Education)**

अस्या: नीते: लक्ष्यम् अस्ति यत् 2030वर्षपर्यन्तं 100% युवान: प्रौढाश्च क्षमतां अवाप्नुयु:

**IX. भारतीयभाषाणां प्रोन्नयम् (Promotion of Indian Languages)**

नीति: सर्वासां भारतीयभाषाणां संरक्षणं विकासं संजीवनं च निश्चेश्यति ।

**X. शिक्षाया: वित्तपोषणम् (Financing Education)**

सार्वजनिकशिक्षाया: प्रसाराय पोषणाय च पर्याप्त: सार्वजनिकनिवेश: विधास्यते।

**XI. राष्ट्रियशिक्षा-आयोग: (Rashtirya Shiksha Aayog)**

संघटनं प्रधानमन्त्रिण: अध्यक्षतायां भविष्यति। इदं भारते शिक्षाया: दृष्टे संरक्षक: भविष्यति।

# नीतिविवरणानां मुख्यबिन्दवः

# विद्यालयीयशिक्षा

## 1. प्रारम्भिकबाल्यावस्थाया: सम्पोषस्य शिक्षायाश्च दृढीकरणं। (Strengthening Early Childhood Care and Education)

---

**उद्देश्यम् :-** 2025-वर्षं यावत् 3-6 वर्षीया: बालका: प्रत्येकं नि:शुल्कं सुरक्षितम् उच्चगुणवत्तापूर्णं विकासात्मकस्तरानुगुणं शिक्षानिभालनं च प्राप्नुवन्तु।

---

नीति: प्रारम्भिकबाल्यावस्थाशिक्षाया: महत्त्वं प्रत्येकं व्यक्ते: कृते यावज्जीवं लाभाय महत्त्वम् आदधाति।

क. प्रारम्भिकशिक्षाया: कृते महत्त्वपूर्ण: प्रसाद: सौविध्यानां सबलीकरणं, स्थानीयावश्यकतानां भौगोलिकवर्तमानप्रारूपेषु च बहुविषयकदृष्टिमाध्यमेन भविष्यति।

ख. सामाजिकार्थिकरूपेण वञ्चितेषु जनपदेषु विशेषरूपेण ध्यानं दास्यति। गुणवत्तानां प्रतिफलानां च सम्यग्-निरीक्षणाय प्रक्रिया: प्रचालयिष्यन्ते।

ग. प्रारम्भिकशिक्षायां शिक्षकेभ्य: मातृपितृभ्य: च अभिप्रेत: एक: पाठ्यचर्यात्मक:, एवमेव शिक्षाशास्त्रीयरूपरेखा विकसिता भविष्यति। रूपरेखायां जन्मत: आरभ्य त्रिवर्षपर्यन्तानां बालकानां उपयुक्ता संज्ञानात्मिका उत्प्रेरणा, त्रिवर्षेभ्य: आरभ्य अष्टवर्षपर्यन्तानां बालकानां कृते शैक्षिकदिशानिर्देशानां प्रवेश: च भविष्यति।

घ. शिक्षार्थिनां अनुकूलवातावरणानां रूपरेखा, चरणविशिष्टं प्रशिक्षणं, परामर्श:, निरन्तरं कौशलविकास: च आजीविकानिर्धारणावसरमाध्यमै: भविष्यति। प्रारम्भिकशिक्षाया: कृते उच्चगुणवत्तापूर्णानां शिक्षकाणां व्यावसायिकीकरणकार्यक्रमाणां आरम्भ: भविष्यति।

ङ. प्रारम्भिकशिक्षाया: सर्वे आयामा: शिक्षामन्त्रालयस्य परिधौ आगमिष्यन्ति। (यथा वर्तमानकाले मानवसंसधानविकासमंत्रालयस्य नामपरिवर्तनं विधास्यते) प्रारम्भिकशिक्षां विद्यालयीयशिक्षया सह प्रभाविरूपेण योजनम्, संयुक्तरूपेण एका संक्रमणयोजना शिक्षामहिलाबालविकासमन्त्रालयस्वास्थ्यपरिवारमंत्राल्यानां मन्त्रिभि: 2019-पर्यन्तं पूर्णतां यास्यति।

च. अनुपालनं सम्पूर्णपूर्वविद्यालयीयशिक्षां (नैजसार्वजनिक: परोपकारकश्च) अन्तर्भूतस्य एकस्य प्रभाविगुणवत्ताविनियमनस्य प्रत्यायनव्यवस्थाया: वा स्थापना भविष्यति।

छ. पितरौ दीर्घस्तरेषु परामर्शमाध्यमै: ज्ञानस्य व्यापकप्रसारमाध्यमैश्च हितधारकेभ्य: अपेक्षाम् उत्पादयिष्येते।

ज. त्रित: षट्वर्षपर्यन्तं आयुजुषाणां बालकानां कृते निशुल्कं अनिवार्यां स्तरीयशिक्षां प्रापयितुं शिक्षाधिकारनियम: 2009 विस्तारयिष्यते।

2. **सर्वेषां बालकानां मध्ये आधारभूतसाक्षरतायाः सङ्ख्याज्ञानस्य च निश्चयीकरणम्।**
**(Ensuring foundational literacy and numeracy among all children)**

---

**उद्देश्यम्** :- 2025-पर्यन्तं पञ्चमकक्षातः आरभ्य सर्वे विद्यार्थिनः आधारभूतसाक्षरतां सङ्ख्याज्ञानं च प्राप्नुयुः। इयं नीतिः प्रारम्भिकभाषाणां गणितस्य च संबंधे शिक्षणाय गभीरां समस्यां स्वीकरोति, तथा च एतस्यै सर्वोत्तमां प्राथमिकतां ददाति।

---

क. पोषणस्य शिक्षणस्य च अभिन्नः सम्बन्धः वर्तते। मध्याह्नभोजनकार्यक्रमाणां विस्तारः भविष्यति। पूर्वप्राथमिकविद्यालयानां प्राथमिकविद्यालयानां च छात्रेभ्यः पौष्टिकः अल्पाहारः मध्याह्नभोजनं च प्रदास्येते। एतेषां कार्यक्रमाणां व्ययं परिवेशितभोजनस्य गुणवत्तां निश्चेतुं खाद्यार्थं व्ययीकरणीयं धनं मुद्रास्फीत्या सह योजयिष्यते।

ख. प्रथमकक्षातः आरभ्य पञ्चमकक्षापर्यन्तम् आधारभूतसाक्षरतायां सङ्ख्याज्ञाने च अधिकेन यत्नेन सह अनुकूलितमूल्याङ्कनस्य गुणवत्तापूर्णसामग्रीणां च उपलब्धतायाः कृते एका प्रकृष्टा व्यवस्था रचयिष्यते। भाषागणितयोः संसाधनानां एकः राष्ट्रियसङ्ग्रहालयः राष्ट्रियशिक्षकान्तर्जालान्तर्गतं समुपलप्स्यते।

ग. शिक्षकाणां साहाय्यार्थं प्राविधिकहस्तक्षेपस्य सञ्चालनं भविष्यति। सार्वजनिकेषु विद्यालयीयपुस्तकालयेषु पठनस्य सञ्चारस्य च संस्कृतिं निर्मातुं विस्तारः करिष्यते।

घ. प्रथमस्तरीयाः सर्वेऽपि छात्राः प्रत्येकं मासत्रयस्य अवधेः विद्यालयीय-सन्नद्धता-प्रतिमानकेन सह नियोजिताः भविष्यन्ति।

ङ. आधारभूतसाक्षरतायां सङ्ख्याज्ञाने च नवीकृताधारेण प्रोत्साहनार्थं शिक्षकशिक्षायाः पुनःप्रतिमाननिर्धारणं भविष्यति।

च. राष्ट्रियानुशिक्षककार्यक्रमः (यत्र विशिष्टाः शिक्षकाः सम्मिलिताः सन्ति) समुदायानुगुणं सूचनां सम्प्राप्य अनुदेशीयसहायककार्यक्रमः (रिमेडियल इंस्ट्रक्शनल ऐड्स प्रोग्राम इति एकस्य उपचारात्मकस्य कार्यक्रमः) आरप्स्यते।

छ. प्रत्येकं विद्यालयीयस्तरे त्रिंशच्छात्राणां कृते एकाध्यापकानुपातः (30:1) सुनिश्चितो भविष्यति।

ज. सामाजिककार्यकर्तार: परामर्शदातार: च सर्वेषां बालकानां स्थिरतां (पलायनावरोधं) मानसिकस्वास्थ्यं च निश्चेतुं सहायतां करिष्यन्ति। मातापित्रो: सहभागिताया: स्थानीयसमुदायानां स्वयंसेवकानां च एकत्रीकरणं दृढीकृत्य आधारभूतसाक्षरतायां सङ्ख्याज्ञाने च सम्बद्धानां नीतिगतानां लक्ष्याणां च पूर्ते: निश्चय: भविष्यति।

## 3. सर्वेषु स्तरेषु शिक्षायां सार्वभौमिकाधिगमस्य स्थैर्यस्य (पलायनावरोधस्य) च निश्चयीकरणम् (Ensuring universal access to and retention in education at all levels)

---

**उद्देश्यम् :-** 2030वर्षंयावत् 3-18 वर्षीयस्य आयुर्वर्गस्य सर्वेभ्य: बालेभ्य: नि:शुल्कं अनिवार्यगुणवत्तापूर्ण-विद्यालयीय-शिक्षाया: प्राप्ते: सहभागिताया: च सुनिश्चितीकरणम्।

---

नामाङ्कनवृद्धौ प्रगतिम् अवधार्य इयं नीति: विद्यालयेभ्य: बालानां पलायनावरोधम् आलक्ष्य अस्माकम् असमर्थतायां चिन्ताया: अभिव्यक्तिं करोति।

क. 2030वर्षं यावत् पूर्वविद्यालयीय-(प्री-स्कूल)–स्तरात् माध्यमिक-विद्यालयीय-स्तरं यावत् 100% समग्रनामाङ्कनानुपात: विभिन्नोपायानां माध्यमै: प्राप्तव्य:।

ख. सर्वेभ्य: विद्यार्थिभ्य: विशेषरूपेण बालिकाभ्य: सुरक्षाया: सुनिश्चितीकरणपूर्वकं, वर्तमानविद्यालयेषु प्रवेशवृद्धिमाध्यमेन, अल्पप्रदत्तस्थानेषु अप्रदत्तस्थानेषु वा नूतनसुविधानां विकासेन, परिवहनेन, छात्रावाससुविधानां च माध्यमेन समर्थितविद्यालयानां यथासङ्गतप्रकारेण अन्तरालानां पूर्ति: विधास्यते।

ग. **सर्वेषां बालानां सहभागित्वम् अधिगम: च** नामाङ्कितबालानाम् उपस्थित्या, शिक्षणप्रतिफलेषु समीक्षया, विद्यालयेभ्य: शिक्षापूर्तिं विना विद्यालयत्यागिषु (Drop outs ) बालेषु विद्यालयेभ्य: बहि: स्थितेषु च बालेषु शिक्षकाणां, सामाजिक-कार्यकर्तॄणां, परामर्शदायकानां च अवधानेन विद्यालयेभ्य: बहि:स्थितकिशोराणां कृते दीर्घकालिक-कार्यक्रमस्य माध्यमेन निश्चितो भविष्यति। औपचारिकाणाम् अनौपचारिकाणां चोपायानां सम्मेलनपूर्वकं मुक्ताया: दूरस्थाया: च शिक्षाया: प्रौद्योगिकी-मञ्चानां च दृढीकरणाय बहवो मार्गा: उपलप्स्यन्ते।

घ. स्वास्थ्यस्य समस्यानां कारणेन विद्यालयेषु विद्यार्थिनाम् उपस्थिते: असमर्थताविषये तेषां विद्यालयेषु यथाशीघ्रं प्रत्यागमनं सुनिश्चेतुम् उपायेषुविद्यालयेषु स्वास्थ्यकार्यकर्तॄणां नियुक्ति:, छात्रेषु, अभिभावकेषु, व्यापकरूपेण च समुदायान्तर्गतं जागरूकताजननं तेषां च स्वास्थ्यसेवाभि: सह संयोजनं कर्तव्यं भविष्यति।

ङ. (शारीरिक्या: मनोवैज्ञानिक्या: च) आवश्यकतामां सुरक्षाया: प्राप्तये समावेशाय च विद्यालयानां लाभेतरप्रकृत्या, शिक्षणाय प्रतिफलेभ्य: न्यूनतमानकस्तर-निर्धारणस्य सुनिश्चितीकरणपूर्वकं शिक्षाधिकाराधिनियमस्य

आवश्यकता: पर्याप्तरूपेण न्यूनतमप्रतिबन्धात्मिका: विधास्यन्ते। एतत् खलु सर्वकारीयाणां सर्वकारेतराणाञ्च विद्यालयानां आरम्भं सरलीकुर्वता स्थानीयविविधता: वैकल्पिकप्रतिरूपाणि च अनुज्ञास्यन्ते ।

च. पूर्वविद्यालयीय-(प्री-स्कूल)-स्तराद् द्वादशकक्षां (12) यावत् नि:शुल्कम् अनिवार्यां: च शिक्षां सुनिश्चेतुं शिक्षाधिकाराधिनियम: विस्तारयिष्यते।

## 4. विद्यालयीय-शिक्षायै नूतनपाठ्यचर्याविषयिणी शिक्षाशास्त्रीया च संरचना

**(New curricular and pedagogical structure for school education)**

**उद्देश्यम्** : शिक्षणे रटनापेक्षया एतत्स्थाने च समग्रविकासं 21तमाया शताब्द्या: कौशलम् यथा-आलोचनात्मकचिन्तनं, रचनात्मकतां, वैज्ञानिकदृष्टिं, सञ्चारं, सहयोगं, बहुभाषितां, समस्यासमाधानं, नैतिकतां, सामाजिकदायित्वं,अङ्कीय-साक्षरतां च प्रोत्साहयितुं पाठ्यचर्याशिक्षाशास्त्रं च 2022यावत् परिवर्तिष्येते।

विद्यालयीय-शिक्षाया: पाठ्यचर्यात्मिका शिक्षाशास्त्रीयसंरचना च शिक्षार्थिनां कृते विभिन्नचरणेषु तेषां विकासात्मका-वश्यकतानां रूचिभ्य: उत्तरदायिनीं प्रासङ्गिकीं च कर्तुं पुन: सङघटयिष्यते।

क. अतएव विद्यालयीयशिक्षाया: पाठ्यचर्यात्मिका शिक्षाशास्त्रीया च रूपरेखा 5+3+3+4 इति प्रतिरूपेण निर्देशिता करिष्यते।

- आधारभूतस्तर: (आयु: 3-8 वर्षात्मकम्) तीव्रबौद्धिकविकास:, क्रीडाया: सक्रियाधारितोपलब्धे: आधारे शिक्षणम्।
- सन्नद्धतास्तर: (8-11 वर्षाणि) क्रीडाधारेण उपलब्धेराधारेण निर्माणम्, व्यवस्थितशिक्षणाय परिवर्तनस्य प्रारम्भ: करणीय:।
- मध्यस्तर: (11-14 वर्षाणि) विषयेषु सङ्कल्पनाशिक्षणम्, किशोरावस्थाया: मार्गदर्शनस्य प्रारम्भ:।
- माध्यमिकस्तर: (14-18 वर्षाणि)- आजीविकायै उच्चतरशिक्षाया: आरम्भ:, कैशोर्यात् युवावस्थायां प्रवेश:।

ख. माध्यमिक-चरणे चतुर्वर्षीयाणि बहुविषयकाणि अध्ययनानि सम्मिलितानि भविष्यन्ति। सममेव एतदन्तर्गतं विषयगहनतायाम् आलोचनात्मक-चिन्तने, जीवनाकाङ्क्षासु ध्याने बलं भविष्यति, तत्र च विद्यार्थिभ्य: रुच्यनुसारम् (विकल्पप्रदान-पुरस्सरम्) नम्रिकत्वं स्थास्यति।

ग. समग्रविकासोन्मुखानां विद्यार्थिनां विकासाय विद्यालयीय-शिक्षाया: सामग्री प्रक्रिया च पुन: प्रारूपयिष्येते। महत्त्वपूर्णसङ्कल्पनानाम् आवश्यकविचाराणानां च अनुरूपं पाठ्यचर्याया: अधिभार: न्यूनीकरिष्यते, अनेन गहनाय समधिकाय च अनुभवात्मकाधिगमाय सम्भावना समुत्पत्स्यते।

घ. भाषासु प्रवीणताया: वैज्ञानिक-दृष्टे, सौन्दर्यबोधस्य कलाभावनाया: च, सम्प्रेषणस्य नैतिकतार्किकताया:, अङ्कीयसाक्षरताया:, भारतीयविद्यानां स्थानीयसमुदायानां च, देशस्य विश्वस्य च पुरत: आगतानां जटिलसमस्यानां च ज्ञानविकासाय सर्वेषां विद्यार्थिनां प्रोत्साहनं करिष्यते।

ङ. नम्रिका (flexible) पाठ्यचर्या – पाठ्यचर्याया:, कलाया: विज्ञानस्य च, व्यावसायिकीनां शैक्षिकीणां विचारधाराणां च स्पष्टतया पृथक्करणेन विना माध्यमिक-विद्यालयीय-स्तरे विषयक्षेत्राणां परिवर्तनस्य सम्भावनाभि: सह विद्यार्थिनां चयनसामर्थ्यं सबलीकरिष्यते।

च. न्यूनान्न्यूनं पञ्चमीं कक्षां यावत् अपितु प्राथमिकरूपेण अष्टमीं कक्षां यावदपि यत्र कुत्रापि आवश्यकं स्यात् एकया नम्रिकया (द्विभाषिण्या) भाषादृष्ट्या सह शिक्षा स्थानीयभाषायां / मातृभाषायां भविष्यति।

छ. उच्चगुणवत्तापूर्णानि पाठ्यपुस्तकानि आवश्यकतानुसारं व्यवहार्यतानुसारं च स्थानीयभाषासु सुलभायिष्यन्ते, दिव्याङ्गविद्यार्थिभ्यश्च पाठ्यसामग्री निर्मास्यते।

ज. सम्पूर्णदेशे त्रिभाषासूत्रं सौहार्द-पूर्वकं प्रभावीकरिष्यते, भाषाशिक्षकाणां विकासाय नियुक्तिभ्यश्च विशिष्टोपाया: करिष्यन्ते।

झ. व्यावसायिककौशले, 6-8 कक्षासु शिल्पकौशले च एकवर्षीयपाठ्यक्रम-गृहीतेभ्य: समस्तविद्यार्थिभ्य: सह व्यावसायिकावसरा: शीघ्रं प्रारप्स्यन्ते। 9-12 कक्षासु बालकानां पार्श्वे 'मिश्रीकरणं द्वन्द्वयुग्मेन रचना' चेति विकल्पेन सह समधिक-पारम्परिक-शैक्षिकपाठ्यक्रमै: सह व्यावसायिकपाठ्यक्रमा: सुलभा: भविष्यन्ति।

ञ. राष्ट्रियपाठ्यचर्याया: रूपरेखा 2020यावत् समीक्षिता संशोधिता च करिष्यते, सर्वासु क्षेत्रीयभाषासु समुपलब्धा च विधास्यते। नूतननानि पाठ्यपुस्तकानि निर्मास्यन्ते, उच्चगुणवत्तापूर्णा: अनुवादा: च करिष्यन्ते।

ट. विद्यार्थिनां विकासस्य समर्थनाय मूल्याङ्कने प्रारूपपरिवर्तनं विधास्यते। सर्वाभि: परीक्षाभि: (बोर्डपरीक्षाभि: सह) उच्चस्तरीयक्षमताभि: सह मूलकौशलानां, सङ्कल्पनानां, कौशलानां च परीक्षणं करिष्यते। अनुकूलितसङ्गणकीकृतपरीक्षणस्य माध्यमेन 2025 वर्षं यावन्मध्यविद्यालयीयस्तरे ततश्चोपरि मूल्याङ्कनम् भविता। 2020/2021-वर्षानन्तरं, स्वायत्तराष्ट्रिय-परीक्षणाभिकरणेन विभिन्नविषयेषु अभिरुचिपरीक्षणस्य (ऐप्टीच्यूड् टैस्ट इत्यस्य) प्रबन्ध: करिष्यते, एकवर्षावधौ एकाधिकावसरेषु भागग्रहणं शक्ष्यते।

ठ. विद्यालयादारभ्य जनपदीयस्यतरं यावत्, आवासीय-ग्रीष्मकालिककार्यक्रमेषु ओलम्पियाड्, चेति प्रतियोगितासु विषयकेन्द्रितानां परियोजनाधारितानां च समितीनां माध्यमेन विलक्षण-प्रतिभासम्पन्नानां रूचीनाम् अभिज्ञानपूर्वकं समायोजनं करिष्यते।

## 5. शिक्षका: - परिवर्तनस्य दीपवाहका:

## (Teachers-Torchbearers of change)

---

**उद्देश्यम् :** इदं निश्चेतव्यं यत् सुयोग्या: सोत्साहा:, व्यावसायिकरूपेण प्रशिक्षिता: स्वकर्मणि निपुणाश्च शिक्षका: एव विद्यालयीय-शिक्षाया: सर्वेषु स्तरेषु सर्वेषां विद्यार्थिनां शिक्षणं करिष्यन्ति

---

इयं नीति: तथ्यमिदं कल्पयति (अवधारयति) यत् शिक्षका: समाजस्यास्य अतितरां महत्त्वपूर्णा: (महत्त्वभाज:) सदस्या: सन्ति, ते एव कस्यापि परिवर्तनस्य भारं स्वस्कन्धेषु धारयन्ति। यदि शिक्षकेषु गुणवत्ता कुशलता च विद्येते, शिक्षा अपि गुणवत्तायुता (उच्चस्तरीया) भविष्यति।

क. यदि साधनविहीना: ग्रामीणा: जनजातीया: च उत्कृष्टा: (मेधाविन:) विद्यार्थिन: चतुर्वर्षीये एकीकृत-शिक्षास्नातककार्यक्रमे प्रवेशं गृहीष्यन्ति, तेभ्य: योग्यताधारिता छात्रवृत्ति: दास्यते (तान् क्षमान् कर्त्तुं योग्यताधारिताया: छात्रवृत्ते: स्थापना भविष्यति)। विशिष्टायां स्थितौ ते स्थानीयक्षेत्रेषु एव वृत्तिं प्राप्नुवन्तु इति सुनिश्चेष्यते। विशेषत: छात्रा: (विद्यार्थिन्य:) स्थानीयक्षेत्रेषु वृत्तिं प्राप्नुवन्तु इति सुनिश्चेष्यते।

ख. विद्यालयेषु शिक्षकाणां नियुक्ति: व्यापक-शिक्षकावश्यकता-योजनाधारिता भविष्यति, यस्यां स्थानीयशिक्षका:, स्थानीय-भाषा-भाषणे क्षमा: च शिक्षका: प्रमुखरूपेण भविष्यन्ति, सममेव वैविध्यं सुनिश्चेष्यते। नियुक्ति-क्रमे प्रथमे स्तरे नूतन-प्रविधि-युता शिक्षक-पात्रता-परीक्षा भविष्यति, तदनन्तरं साक्षात्कार:, आदर्शशिक्षण-प्रदर्शनं च भविष्यति। यथा अनेकेषु राज्येषु परम्परेयं प्रचलति तथैव शिक्षका: स्वजनपदे (जिला) कस्मिंश्चित् विद्यालय-विशेषे एव नियुक्ता: भविष्यन्ति। तेषां (शिक्षकाणां) स्थानान्तरणं कस्यापि निश्चितस्य कार्यकालस्य अनन्तरम् एव भविष्यति। स्थानान्तरणस्य व्यवस्थेयं पारदर्शिनी प्रविधि-नियमाधारिता च भविष्यति। शिक्षका: ग्रामीणक्षेत्रे पाठनार्थं प्रोत्साहयिष्यन्ते।

ग. 2022 वर्षपर्यन्तं संपूर्णदेशे अर्धकुशलानां (अयोग्यानाम् अनुबन्धाधारितानां च) शिक्षकाणां नियुक्ति: अवरोत्स्यते।

घ. सततव्यावसायिक-क्षमता-संवर्धन-कार्यक्रमाणां चयनं शिक्षका: स्वरूच्यनुसारं कर्त्तुं शक्नुवन्ति (शक्ष्यन्ति)। शिक्षका: किं कथञ्च ज्ञातुम् इच्छन्ति, इति तै: एव निश्चेतव्यम्। प्रारम्भिकाणां शिक्षकाणाम् उपरि, तेषाम् अवगमनोपरि, तेषां कृते आवश्यकपरामर्शोपरि च विशेषरूपेण अवधानं दास्यते। राज्यानाम् इदं कर्त्तव्यं भवेत् यत् ते रूच्याधारितव्यावसायिकविकासं निश्चेतुं शिक्षकाणां व्यावसायिकप्रक्षेप-मार्गम् अवबोद्धुं च प्रविधि-आधारितां

प्रक्रियां पालयन्तु। पाठ्यचर्यायाः केन्द्रीकृतं निर्धारणं न भविष्यति, न चापि आदर्शसोपान-प्रशिक्षणं भविष्यति, उत कठोरमानकोऽपि न स्थास्यति। एतादृशानां कार्यक्रमाणां क्रियान्वयनाय विशेषज्ञानां (Resource Person) चयनम् अवधानपूर्वकं भविष्यति, तेषां प्रभाविप्रशिक्षणं कारयिष्यते, तेषां भूमिका च पर्याप्त-अवधये भविष्यति।

ङ. शिक्षकाणां कार्यं सौविध्यपूर्णं कर्तुं पर्याप्त–आधारभूत-संरचना, शिक्षण-संसाधनानि, आदर्श-शिक्षक-छात्र-अनुपातश्च भवेयुः इति निश्चेतव्यम्। "सर्वेषां विद्यार्थिनाम् अधिगमं निश्चेतुं शिक्षकाणां सहायतार्थं सर्वेषु स्तरेषु उपचारात्मकाः कार्यक्रमाः भविष्यन्ति।

च. विद्यालयीय-अवधौ शिक्षकाः अशैक्षणिककार्यव्याजेन शिक्षण-कर्त्तव्यात् प्रमादं मा कुर्युः। यथा-मध्याह्न-भोजन-पाचनं, विद्यालयवस्तूनां क्रयणम् इत्यादयः। यदि एवं न भवति (शिक्षकाः शिक्षण-समये शिक्षणेतरकार्येषु व्यापृताः भवन्ति), तर्हि ते कारणं विनैव अवकाशस्थितौ वर्तन्ते, अथवा स्वीकृतिं विनैव अवकाशं गृह्णन्ति, इति मत्वा उत्तरदायिनः भविष्यन्ति।

छ. सबल-विकास-प्रक्रियानिर्माणार्थं विद्यालय-समर्थक-संस्कृतिरचनार्थं च प्रत्येकं मुख्याध्यापकः प्रधानाचार्यः वा उत्तरदायी भविष्यति। संवेदनशीलायाः विद्यालय-प्रबन्धन-समितेः व्यवस्था भविष्यति। (विद्यालय-प्रबन्धन-समितेः सदस्याः संवेदनशीलाः भविष्यन्ति) शिक्षानिदेशालयस्य अधिकारिणः चापि स्वकर्त्तव्य-सम्पादन-शैलीविषये पुनर्विचारं करिष्यन्ति यया एतादृशी संवेदनशीलता सर्वेषां व्यवहारे परिलक्षिता भवेत्।

ज. "सर्वे विद्यार्थिनः विद्यालयं प्राप्नुवन्तु" इति लक्ष्यमधिकृत्य सर्वकारेण शिक्षकेभ्यः शिक्षक-प्रशिक्षकेभ्यश्च भारतीयभाषा-निबद्धा उच्चस्तरीया सामग्री दास्यते।

झ. वर्तमाने यानि शैक्षिक-सहायता-संस्थानानि सन्ति, तेषां स्तरोन्नयनार्थम् अवधानपूर्वकं योजना-निर्माणाय प्राथमिकता प्रदास्यते। एतासां योजनानां सहव्यवहारभूमौ आनयनाय व्यवस्था भवतु इति प्रयतिष्यते।

ञ. ये शिक्षकाः शैक्षिक-प्रशासने शिक्षक-शिक्षा-क्षेत्रे वा रुचिं धारयन्ति, तेऽपि कतिपयवर्षाणि शिक्षण-कार्यस्य अनुभवं सम्प्राप्य एव तत्र प्रवेशं लब्धुम् अर्हन्ति। ये शिक्षकाः शिक्षण-प्रशासने कार्यं कर्तुम् इच्छन्ति, ये च पाठनसमये उत्कृष्टं प्रदर्शनं कृतवन्तः सन्ति, तेभ्यः दीर्घावधौ प्रशासन-पदानि आरक्षितानि भविष्यन्ति।

## 6. सम्पूर्णे देशे प्रत्येकं छात्राय साम्यिकी समावेशिनी च शिक्षा

**(Equitable and inclusive education for every child in the country)**

अस्या: नीते: उद्देश्यम् एकस्या: शिक्षा-व्यवस्थाया: सज्जीकरणम् (निर्माणम्) अस्ति, यस्यां सर्वे बालका: (विद्यार्थिन:) लाभान्विता: भवेयु:, यस्याञ्च जन्मन: पृष्ठभूमे: परिस्थितीनां कारणात् कोऽपि विद्यार्थी शिक्षणस्य(अधिगमस्य), उत्कृष्टता-प्राप्ते: च कमपि अवसरं मा मुञ्चेत्।

---

**उद्देश्यम् :** एकस्या: समावेशिन्या: समुचिताया: च शिक्षा-व्यवस्थाया: स्थापनम्, यस्यां सर्वे बाला: अधिगमस्य सफलतायाश्च समम् अवसरं प्राप्नुयु:, यत: 2030 पर्यन्तं सर्वेषां लिङ्गानां सामाजिक-वर्गाणां च शिक्षायां समा सहभागिता भवतु, तेषाम् शिक्षण-प्रतिफलञ्चापि समं भवतु।

---

क. अल्प-प्रतिनिधित्व–भाजां समूहानां विद्यार्थिनां अधिगम-लक्ष्य-प्राप्त्यर्थं प्रारम्भिकबाल्यावस्था-शिक्षा, आधारभूता साक्षरता, संख्याज्ञानम्, विद्यालय-प्रवेश:, नामाङ्कनम्, नियमिता उपस्थितिश्च सुनिश्चिता: भवन्तु, इत्येतद-नीति-निर्माणं कार्यान्वयनञ्च।

ख. अखिलेऽपि देशे सुविधावञ्चितेषु क्षेत्रेषु विशिष्ट-शिक्षा-क्षेत्राणि स्थापयिष्यन्ते। एतानि क्षेत्राणि स्पष्ट–सामाजिक-विकासानां सामाजिकार्थिकसंकेतकानां च आधारेण घोषितानि भवन्तु, इत्युद्दिश्य राज्यसर्वकारा: प्रोत्साह्या: भविष्यन्ति। राज्यसर्वकार: एतेषां लक्ष्याणां प्राप्तये यावन्तं व्ययं करिष्यति, तस्य 2:1 अनुपातेन केन्द्र-सर्वकार: वित्तीय-सहायतां प्रदास्यति। अस्यां नीतौ सुविधाविहीनानां समूहानां कृते यल्लक्ष्यं निर्धारितमस्ति, तस्य प्राप्ति: कथं भवतु इति केन्द्र-राज्य-सर्वकारयो: सन्वित: प्रयासो भविष्यति।

ग. एतदर्थं कतिपय-बिन्दव: सन्ति- शिक्षका: निरन्तरं संवेदनशीलतां वर्धयन्त: स्वक्षमतासंवर्धनं कुर्वन्तु, शैक्षणिकस्तरे अल्प-प्रतिनिधित्व-भाग्भ्य: समूहेभ्य: शिक्षकाणां नियुक्त्यर्थं वैकल्पिक-मार्ग-निर्माणं भवतु, शैक्षणिकस्तरे अल्प-प्रतिनिधित्वभाग्भ्य: समूहेभ्य: शिक्षार्थिनां सहभागिता अधिकाधिका भवतु, छात्र-शिक्षकानुपातश्च 25:1 पर्यन्तम् एव भवतु, (पञ्चविंशतिछात्राणां कृते एक: शिक्षक: भवतु इति पद्धति:) समुचित-तंत्र-स्थापना-माध्यमेनपाठ्यचर्या-परिवर्तनमाध्यमेन च विद्यालये समावेशि-वातावरणस्य निर्माणम्, यस्मिन् उत्पीडनम्, शोषणम्, लिङ्गाधारिता हिंसा, बहिष्कार-प्रथा च कुत्रापि न भवेत्।

घ. केन्द्रीयशैक्षिकसांख्यकीप्रभागेन यत् प्रदत्त- (डाटा) विश्लेषणं कृतं तेन सह प्रत्येकं विद्यार्थिन: अद्यतनसूचना राष्ट्रिय-शैक्षिक-प्रदत्ता-(डेटा) राष्ट्रिय-भाण्डारे स्थापयिष्यते।

ङ. इयं नीति: अल्पप्रतिनिधित्वभाजां समूहानां विद्यार्थिनां कृते छात्रवृत्तिं, विकासशीलं संसाधनं अन्यं च सौविध्यं प्रदातुं निर्मितात् राष्ट्रिय-कोषात् विशिष्टेभ्य: विद्यार्थिभ्य: वित्तीयसहायतां ददाति, सममेव वित्त-प्राप्ते: यल्लक्ष्यं निर्धारितम्, तस्य प्राप्ति: कथं भवतु, जनपदेषु संस्थानेषु च तद् धनं प्राप्नोतु इत्यस्य व्यवस्था कथं भवेत् इत्यिप निश्चिनोति। शैक्षिक-समर्थनस्य वैकल्पिकसाधनेषु राष्ट्रिय-अनुशिक्षक-कार्यक्रम:, उपचारात्मकेषु सहशैक्षिकोपकरणकार्यक्रमेषु नियुक्ति:, मध्याह्न-भोजनम् अतिरिच्य अल्पाहारस्य व्यवस्था विशेष-प्रशिक्षणस्य चापि अवसरा: सम्मिलिता:। समावेशिशिक्षणोपरि अनुसंधानकार्याय वित्तीय-सहायताया: अपि व्यवस्था भविष्यति।

च. अस्यां नीतौ विद्यालय-शिक्षकाणां विद्यार्थिनीनाम् (छात्राणाम्) लैङ्गिकासंतोलनं दूरीकर्त्तुम् स्त्रीणां सहभागिता बालिका-शिक्षा च, जनजातीनां, जाति-सम्प्रदायाधारितानां समूहानां विद्यार्थिनां शिक्षा चापि विधातव्या, यया एतेषां समूहानां बाला: अपि एतेषां कृते निर्धारितानां सुविधानां लाभं प्राप्नुवन्तु। नगरे चापि निर्धनक्षेत्रेषु ये निर्धना: छात्रा: सन्ति, ते अपि शिक्षाया: अवसरं प्राप्नुवन्तु, दिव्याङ्गछात्रा:, परिवर्तित-लिङ्गस्य (ट्रांस-जेण्डर) छात्रा: चापि स्वस्मिन् परिवेशे समाजस्य मुख्यधाराया: छात्रै: सह द्वादशकक्षापर्यन्तं शिक्षां प्राप्नुवन्तु इत्यादय: अस्या: शिक्षानीते: उल्लेखनीया: पदक्षेपा: सन्ति।

## 7. विद्यालय- सङ्कुल- माध्यमेन विद्यालयीयशिक्षायां प्रशासनम्

(अनेकेषां विद्यालयानां एक: परिसर: स्थापनीय:)

**(Governance in school education through school complexes)**

---

**उद्देश्यम्-** एकस्मिन् परिसरे अनेके विद्यालया: स्थापिता: भवेयु: येन सर्वे विद्यालया: एकैकश: संसाधनानाम् उपयोगं कर्तुं क्षमा: भवन्तु, येन विद्यालयप्रशासनकार्यं कुशलतरं स्थानीयतरं सुपरिणामप्रदं च भवतु।

---

विद्यालय-परिसराणां स्थापनया ते विद्यालया: लाभान्विता: भविष्यन्ति ये संसाधनानां आधारभूतसंरचनानाञ्च अभावम् अनुभवन्ति। अनेके सार्वजनिकविद्यालया: एकस्मिन् संघटनात्मके प्रशासनात्मके च क्षेत्रे एकत्रीकरिष्यन्ते येन विद्यालयानां भौतिकस्थानान्तरणं विनैव संसाधनानां विनिमयेन छात्रा: निर्बाधं प्रयोगं कर्तुं शक्ष्यन्ति।

क. 2023पर्यन्तं राज्यसर्वकारा: जनसंख्या-वितरणं, सम्पर्कं अन्यं च स्थानीय-महत्त्वम् आधारीकृत्य परिसरेषु विद्यालयानां संयोजनं (समूहीकरणम्) करिष्यन्ति। समूहीकरणस्य अस्मिन् प्रयासे तेषां विद्यालयानां समीक्षा अपि भविष्यति यस्मिन् अत्यल्पा: (20) विद्यार्थिन: पठन्ति, समीक्षानन्तरं तेषां समन्वय: (consolidation) अपि संभाव्यते। अस्या: समीक्षाया: राज्येषु वर्तमानानां विद्यालयानां यथार्थस्थिते: आकलनम् अपि भविष्यति। द्वयो: विद्यालययो: एकीकरणेन च परिवहन-व्यवस्थादि-अन्योपायानाम् उपभोगेऽपि काठिन्यं न भविष्यति।

ख. विद्यालय-परिसरस्य स्थापनेन लघु-विद्यालयानां पार्थक्यं समाप्तिम् एष्यति, अनेन परस्परं सहयोग-भावनया शैक्षिकक्षेत्रे प्रशासनिकक्षेत्रे च कार्यं कुर्वताम् शिक्षकाणां प्रधानाध्यापकानां च एकस्य समूहस्य निर्माणं भविष्यति। सार्वजनिक विद्यालयीय-प्रक्रियाया: प्राथमिक-प्रशासनिक-केन्द्रं विद्यालयपरिसर: भविष्यति।

ग. ये सार्वजनिकविद्यालया: (10-20) एकस्मिन् सन्निहिते भौगोलिक-क्षेत्रे आरंभत: सन्ति (प्रथमकक्षात: द्वादशकक्षापर्यन्तं शिक्षा-प्रदानस्य व्यवस्थां निर्वहन्ति तेषाम् विद्यालयानां संख्या दशत: विंशतिपर्यन्तं भवितुम् अर्हति) तेषां समूहीकरणं भविष्यति। माध्यमिकविद्यालयस्य प्रधानाचार्य: विद्यालय-परिसरस्य प्रमुख: भविष्यति।

घ. प्रत्येकं विद्यालय-परिसर: एकम् अर्ध-स्वायत्त: एकांश: भविष्यति यस्मिन् न्यूनतमे एकस्मिन् विद्यालये प्रथमत: द्वादश-कक्षापर्यन्तं शिक्षा प्रदास्यते, एकस्मिन् नवमत: द्वादशकक्षापर्यन्तम्, अपरस्मिन् च विद्यालये आधारभूता शिक्षा, प्रारंभिकी शिक्षा, मध्यस्तरीया शिक्षा च प्रतिवेशिक्षेत्रे प्रदास्यते।

ङ. विद्यालय-परिसरेषु विद्यालयानाम् एकीकरणेन विषय-शिक्षकाणां, क्रीड़ा-शिक्षकाणां, संगीत-शिक्षकाणां कला-शिक्षकाणां, मनोविश्लेषकाणां, सामाजिक-कार्यकर्तॄणां च सेवा सर्वेषु विद्यालयेषु सम्यक्-रूपेण प्रदातुं शक्ष्यते। अनेन प्रयोगशालानां, पुस्तकालयानां, संगणकोपकरणानां, संगीत-वाद्य-यन्त्राणां, क्रीड़ोपकरणानां, क्रीडाक्षेत्राणाञ्च, सुव्यवस्थित: सामूहिकोपयोग: भविष्यति येन सार्वजनिकसंसाधनानां सौविध्यानां अधिकतम: उपयोग: भविष्यति।

च. अस्यां शिक्षानीतौ एकस्मिन् भौगोलिक-क्षेत्रे सुसम्बद्धानां शैक्षिकसौविध्यानां सुनियोजितपुटक-(समूह) – निर्माणस्य महत्त्वपूर्णं लक्ष्यमस्ति, यस्मिन् प्रारंभिकी त्रिवर्षीया शिक्षा, व्यावसायिक-शिक्षा-प्रदातृ-संस्था, प्रौढ़-शिक्षा-प्रदातृ- संस्था, शिक्षक-सहयोगिनी संस्था, दिव्याङ्गबालानां च कृते शिक्षां दास्यन्ति। जनपदे स्थितम् उच्च-शिक्षण-संस्थानमपि शिक्षकाणां व्यावसायिक-विकासकार्यक्रमे साहाय्यं दास्यति।

छ. प्रत्येकं परिरसस्य कृते एका व्यापक-शिक्षक-विकास-योजना निर्मास्यते यस्यां समकक्ष-शिक्षण-समुदाय: (Peer Learning Communities) साप्ताहिक-गोष्ठी माध्यमेन, शिक्षक-शिक्षण-केन्द्र-माध्यमेन विकसित: स्यात्, निरन्तरं कार्यं च कुर्यात् इति सुनिश्चेष्यते। एतदतिरिच्य सतत-दक्षता-संवर्धनार्थम् अन्ये अपि अवसरा: प्रदास्यन्ते, यथा-कार्यशाला,कक्षान्तर्गतं निरीक्षणम्, प्रदर्शन-परीक्षण-प्रक्रिया इत्यादय:। विद्यालयपरिसर-व्यवस्थानुरूपम् एव शैक्षणिक-व्यवस्था, शिक्षक-सहायता-व्यवस्था च निर्मास्यते यस्याम् जनपद-शिक्षण-प्रशिक्षणसंस्थानम्, प्रखण्ड-संसाधन-केन्द्रम् समूह- संसाधन-केन्द्रञ्च (Cluster-resource-centre) सम्मिलितानि भविष्यन्ति।

ज. प्रत्येकं विद्यालय-परिसरे एका विद्यालय-प्रबंधन-समिति: भविष्यति यस्या: सदस्या: परिसरे स्थितानां सर्वेषां विद्यालयानां प्रतिनिधय: भविष्यन्ति। एतदतिरिच्य परिसर-सम्बद्धा: प्रौढ़-शिक्षा-केन्द्रस्य-समूह-संसाधन-केन्द्रस्य प्रतिनिधय: अपि समिति-सदस्या: भविष्यन्ति। विद्यालय-पक्षत: राज्यसर्वकार-समक्षं, तस्य अङ्गभूतसंस्था-समक्षं स्वपक्षोपस्थापनस्य, राज्यसर्वकारेण गृहीते निर्णये, विचारे च हस्तक्षेपस्य अधिकार: समिते: सकाशं भविष्यति। इयं समिति: शिक्षकाणां प्रदर्शन-प्रबन्धने केन्द्रीयभूमिकानिर्वहणं चापि करिष्यति।

झ. विद्यालय-परिसरस्य योजना-निर्माणार्थं प्रत्येकं विद्यालय: स्वयोजनां विकासयिष्यति (स्वयोजना-निर्माणं करिष्यति)। अत: परं योजनेयं शिक्षा-विभागेन समर्थिता भविष्यति। प्रत्येकं जनपदे विद्यालय-व्यवस्थाया: निरीक्षणाय तस्या: कार्याणां सबलीकरणाय च एका जनपद-शिक्षा-परिषद् अपि भविष्यति।

## 8. विद्यालयीयशिक्षाया: विनियमनम्
**(Regulation of school education)**

---

उद्देश्यम् : भारतस्य विद्यालय-शिक्षा-प्रणाली प्रभावि-विनियमन-माध्यमेन प्रत्यायन–माध्यमेन च सबला भवति, या च सत्यनिष्ठां पारदर्शितां च सुनिश्चितां करोति, शैक्षिक-परिणामस्य निरन्तरम् उन्नयनार्थं गुणवत्तां नवाचारं च वर्धयति।

---

शैक्षणिक-स्तरवर्धनार्थं विनियमनम् आवश्यकं महत्त्वपूर्णं च, इति अवधार्य विद्यालय-शिक्षा-व्यवस्था ऊर्जान्विता कर्त्तव्या।

क. विभिन्नेभ्य: निकायेभ्य: विद्यालय-सेवा-प्रावधानस्य विनियमनं सञ्चालनं च भविष्यति येन पारस्परिक हितेषु (लाभेषु) संघर्ष: न भवेत्। नीति-निर्धारणम्, विनियमनम्, सञ्चालनम्, शैक्षणिक-क्रियाकलापा: च विभिन्नाभि: व्यवस्थाभि: सम्पादयिष्यन्ते।

ख. प्रत्येकं राज्याय एक: स्वतंत्र: अर्धन्यायिक-स्तरीय: राज्य-व्यापि-निकाय: निर्मास्यते य: राज्य-विद्यालय-नियामक-प्राधिकरणम् इति नाम्ना अभिधास्यते। विद्यालय-शिक्षा-निदेशालय: च सम्पूर्णराज्यस्य सार्वजनिक-विद्यालयीय-व्यवस्थाया: सञ्चालनं करिष्यति।

ग. विनियमनस्य आधार: विद्यालयगुणवत्ता-मूल्याङ्कनेन, प्रत्यायन-रूपरेखया च सूचिता प्रत्यायन-व्यवस्था भविष्यति। रूपरेखेयं आधारभूतमानदण्डाधारिता भविष्यति। इयं भविष्ये विद्यालय-स्थापनार्थं अनुज्ञापत्रमपि दास्यति। विद्यालया: स्वप्रत्यायनं प्राप्य लेखा-परीक्षार्थं तन्त्रमेकं स्थापयिष्यन्ति। प्रक्रियेयं सार्वजनिक-विद्यालयेषु नैज-विद्यालयेषु च उभयत्र समरूपं चलिष्यति।

घ. विनियमनस्य प्रवर्तनं वर्तमान-निरीक्षक-दृष्ट्या न भविष्यति, अपितु माता-पितरौ अभिभावका: वा स्वयमेव लोक-परिधौ विद्यालय-सम्बद्धां सर्वां सूचनां प्राप्य नियामका: भविष्यन्ति।

ङ. राज्ये मानक-स्थापनं, पाठ्यक्रमेण सह सर्वेषां शैक्षणिकस्तराणां नेतृत्वं च राज्य-शैक्षिक-अनुसंधान-परिषदा सन्नेष्यते। पाठ्यचर्या-निर्धारणे, पाठ्यपुस्तक-निर्धारणे च राज्ये प्रमाणीकरणस्य/ परीक्षापरिषद: काऽपि भूमिका न भविष्यति, परं यदा छात्रा: विद्यालयं परित्यजन्ति, तदा तेषां दक्षता-प्रमाणीकरणं राज्य-परीक्षा-परिषद् करिष्यति।

च. लोकोपकारिण: नैज-विद्यालया: प्रोत्साहनीया:, ते च नियामक-भारेण मुक्ता: भवितव्यम्। सममेव वाणिज्यिक-लाभार्थं स्थापिता: नैज-विद्यालया: अवरोद्धव्या:।

छ. सार्वजनिकविद्यालयानां नैजविद्यालयानां च विनियमनाय एक: एव मानदण्ड:, एक: एव निकष: एका एव प्रक्रिया भविष्यति। ये नैजविद्यालया: सार्वजनिक-हित-भावनया प्रचलन्ति,ते प्रोत्साहनीया:।

ज. राज्य-शैक्षिक-अनुसंधान-प्रशिक्षण-परिषदा प्रत्येकं राज्याय विद्यालय-गुणवत्ता-मूल्याङ्कनाय प्रत्यायनाय च एका संरचना निर्मास्यते। अस्या: संरचनाया: उपयोग: राज्य-विद्यालय-नियामक-प्राधिकरणेन प्रत्यायन-व्यवस्थाया: आधारोपरि विद्यालयानां नियमनाय भविष्यति।

झ. विद्यालयेषु विद्यालयव्यवस्थादिषु च पाठ्यचर्या-चयनाय सारल्यं भविष्यति। इयं च राज्य-पाठ्यचर्या-प्रारूपेण सह संयोज्या भविष्यति।

ञ. सर्वे निकाया: सर्वाश्च संस्था: वार्षिकयोजना-निर्माणेन सह मध्यावधि-योजना-निर्माणं (त्रिवर्षीया पञ्चवर्षीय वा) चापि करिष्यन्ति। शीर्ष-प्रशासन-निकायश्चापि एकां व्यवस्थितां समीक्षा-प्रक्रियां स्थापयिष्यति (सज्जीकरिष्यति)

ट. राष्ट्रिय-शैक्षिकअनुसंधान-प्रशिक्षण-परिषद् विद्यार्थिनां अधिगम-स्तराणां परीक्षणाय निदर्शनाधारितं राष्ट्रिय-उपलब्धि-सर्वेक्षणं कारयिष्यति। राज्यानाम् अयमपि अधिकार: भविष्यति यत् तानि जनगणना-आधारितं राज्य-मूल्याङ्कन-सर्वेक्षणं कुर्यु:।

ठ. विद्यालयानां विनियमनाय प्रशासनाय च संविधानेन प्रदत्तस्य "शिक्षाया: अधिकारस्य" अपि समीक्षा भविष्यति, समीक्षानन्तरम् आवश्यकं संशोधनं चापि विधास्यते, येन अस्यां शिक्षानीतौ अधिनियमितानन्तरम् अधिगमाधारित-विकासाय व्यवस्था भवेत्।

# उच्चतरशिक्षा

## 1. संस्थागता नूतनसंरचना
**(New institutional architecture)**

---

**उद्देश्यम्**- उच्चतरशिक्षाव्यवस्थाया: परिष्करणम्, अशेषे हि देशे विश्वस्तरीयानां संस्थानां विरचनम्, 2035 यावत् सकलनामाङ्कनानुपातस्य प्रतिशतं पञ्चाशन्मितं विवर्धनम् च।

---

उच्चतरशिक्षार्थं नूतनाया: शिक्षाया: संरचनायाश्च परिकल्पनम् उच्चस्तरीयै: शोभनसंसाधनैश्च समन्विताभि: बहुविषयसमन्वित-स्पन्दितसंस्थाभि: समं संकल्पितमस्ति। प्रवर्तमाना: 800 विश्वविद्यालया: 40000 महाविद्यालया: च प्राय: 15000 सर्वोत्कृष्टसंस्थासु समन्विता: विधास्यन्ते।

क. नूतनेयम् उच्चतरशिक्षासंरचना शिक्षणाय अनुसन्धानाय च उच्चस्तरीयै: शेभनसंसाधनैश्च युता: स्पन्दिता: स्वायत्ताश्च बहुविषयकसंस्था: विरचयिष्यति या सुदृढशैक्षिकसमवायान् विरचयन्ती लक्ष्यं धारणशक्तिं (सामर्थ्यं) च संवर्धयिष्यति। सर्वा: उच्चतरशिक्षणसंस्था: विषयान् विषयक्षेत्राणि च समुल्लंघ्य बहुविषयकसंस्थात्वेन स्थास्यन्ति।

ख. संकेन्द्रीकरणे वैषम्यदृष्ट्या त्रिविधा: संस्था: भविष्यन्ति। एता: सर्वा: विशिष्टगुणाधारिता: भविष्यन्ति। तदित्थम्-

- प्रथमा- या सर्वेषु विषयेषु विश्वस्तरीयानुसन्धाने विशिष्टगुणाधारितशिक्षणे संकेन्द्रिता भवेत्।
- द्वितीया- या अनुसंधाने महनीययोगेन साकं विषयेषु विशिष्टगुणाधारितशिक्षणे संकेन्द्रिता भवेत्।
- तृतीया - या स्नातक शिक्षाऽऽधारितविषयेषु विशिष्टगुणाधारितशिक्षणे संकेन्द्रिता भवेत्।

ग. पुन: सरंचनेयं वर्तमानसंस्था: सुदृढीकृत्य पुनर्विरच्य अपि च नूतनानि भवनानि निर्माय सुव्यवस्थया सुविचारेण च करिष्यते। नूतनामिमां संस्थागतसंरचनाम् उत्प्रेरयितुं 'मिशननालन्दा, मिशन-तक्षशिला: चेति प्रकल्प: समारप्स्यते। भारतीय- लिबरलआर्ट्स-संस्थानम्, बहुविषयकशिक्षा, शोधोन्मुखिविश्वविद्यालयश्चेति काश्चन गतिवर्धकसंस्था: :- उपरिनिर्दिष्टप्रकल्पस्य अंशत्वेन स्थापयितुं शक्यन्ते।

घ. सर्वा: संस्था: विश्वविद्यालया: भविष्यन्ति उपाधिप्रदातार: खायत्तमहाविद्यालया: वा भविष्यन्ति।

ङ. निष्पक्षपारदर्शिव्यवस्थया च सार्वजनिकोच्चतरशिक्षां विस्तारयितुं एतां च षोषणाधायिनीं कर्तुं पर्याप्त–सार्वजनिक-विनिवेशो भविष्यति।

च. सुविधाविरहितभौगोलिकक्षेत्रेषु विशिष्टगुणाधारितानां संस्थानां विकसनं प्राथमिकता भविष्यति।

छ. नूतनेयं संस्थागतसंरचना दक्षतापूर्णक्षेत्रैः सहितानि सर्वाणि क्षेत्राणि आत्मसात्करिष्यति।

## 2. उच्चगुणवत्तापूर्णायाम् उदारशिक्षायाम् अवधानम्
**(Focus on high quality liberal education)**

---

**उद्देश्यम् :** चितेषु विषयेषु क्षेत्रेषु च दुर्धर्ष-वैशिष्ट्येन साकं सर्वेषां शिक्षार्थिनां समग्रविकासाधायिनीं बहुकल्पनाशीलां व्यापकोदारशिक्षां प्रति अग्रेसरणम्।

---

स्नातकस्तरीया: सर्वा: कार्ययोजना: उदारशिक्षाव्यवस्थया अभिज्ञास्यन्ते। व्यवस्थेयं कल्पनाशील-नम्रक-(flexible) पाठ्यचर्यात्मकसंरचनाभि: समग्रविकासाय आधाररूपेण, अध्ययनस्य विषयाणां रचनात्मकसंयोजनत्वेन, एकीकृतकार्ययोजनानामन्तर्गते बहुद्वारीय-प्रवेश-निर्गमनबिन्दुत्वेन, चितेषु विषयेषु क्षेत्रेषु च दुर्धर्षवैशिष्ट्यप्रदानत्वेन च भवेत्।

क. साम्बिधानिकमूल्यानां विकासस्योद्देश्याय व्यापक-बहुविषयिप्रकाशनेन साकम् उदारशिक्षा उच्चतरशिक्षाया: उदारत्वेन भवेत्। इयं हि आवश्यकजीवनसामर्थ्यम्, परिशुद्धविषयावबोधम् सामाजिकनैतिकानुबन्धम् च प्रवर्धयिष्यति। दक्षतापूर्ण-व्यावसायिकक्षेत्रसहितेषु सर्वेषु विषयेषु कार्यक्रमेषु क्षेत्रेषु च स्नातकोपाधिं यावत् इयमेव दृष्टि: भविष्यति।

ख. केन्द्रं हि भारतीयप्रौद्योगिकसंस्थानानाम् अनुरूपं स्तरे च दशसंख्याकानि भारतीय-लिबरल-आर्ट्स्संस्थानानि/बहुविषयशिक्षाऽनुसन्धानविश्वविद्यालयान् स्थापयिष्यति।

ग. कल्पनाशीला: उदाराश्च पाठ्यक्रमसंरचना: अध्येयविषयाणां रचनात्मकसंयोजनानि समर्थानि करिष्यन्ति। शिक्षार्थिभ्यश्च कानिचन प्रवेशनिर्गमनद्वाराणि प्रदास्यन्ति। इत्थं प्रवर्तमानप्रचलितदृढसीमानं ध्वस्तीकृत्य इमे जीवनपर्यन्तं शिक्षणसम्भावना: उत्पादयिष्यन्ति। स्नातकशोधस्तरीया शिक्षा (masters and doctoral) सघनानुसन्धानाधारितवैशिष्ट्यं प्रदास्यति।

घ. स्नातकोपाधे: अवधि: त्रिवर्षीय: चतुर्वषीयो वा भवितुमर्हति। संस्थानानि एतस्मिन् अवधौ समुचितप्रमाणीकरणेन साकं बहुनिर्गमनस्य विकल्पं प्रदातुमर्हन्ति। एकस्मिन् विषये क्षेत्रे वा द्विवर्षं यावत् अध्ययनानन्तरं प्रोन्नतडिप्लोमा-(व्यावसायिकं दक्षतायुतं च) इति उपाधिपत्रं अथवा एकवर्षं यावत् अध्ययनानन्तरं प्रमाणपत्रमेकं प्रदातव्यम्।

ङ. चतुर्वर्षीय: पाठ्यक्रम: शिक्षार्थिभ्य: उदारशिक्षाया: पूर्णशृंखलाया: अनुभवावाप्तेरवसरं प्रदास्यति। चितेषु बृहद्विषयेषु लघुविषयेषु च अयम् उदारकलास्नातक इत्युपाधि: कथयिष्यते। त्रिवर्षीय: कार्यक्रम: स्नातकस्योपाधिसमं भविष्यति। एतौ द्वौ एव पाठ्यक्रमौ स्नातक-विशिष्टोपाधिना समं स्वीकरिष्येते शिक्षार्थिनश्चेत् शोधकार्यं कुर्वन्ति।

च. केषुचित् व्यावसायिकपाठ्यक्रमेषु (शिक्षकशिक्षणम्, आभियान्त्रिकी, चिकित्सा, विधि: इत्यादिषु) स्नातकोपाधि: चतुर्वर्षीयो भवेत्।

छ. संस्थानानाम् अधिकारे स्नातकोत्तरोपाधे: विविधपरिकल्पना: निर्मातुं आनम्यता भविष्यति। मन्ये परिकल्पनेयं द्वि-वर्षात्मिका भवेत् यस्मिन् द्वितीयं वर्षं सर्वथा अनुसंधानाय समर्पितं भवेत्। यै: त्रिवर्षात्मक: स्नातककार्यक्रम: सम्पादितोऽस्ति, तेभ्य: पञ्चवर्षात्मक: एकीकृत: स्नातकोत्तरकार्यक्रम: भवितुमर्हति, स्नातकविज्ञोपाधिना समं चत्वारि वर्षाणि यावत् स्नातकोपाधिग्रहीतृभ्य: छात्रेभ्य: एकवर्षीय: स्नातकोत्तरपाठ्यक्रम: भवितुमर्हति।

ज. शोधोपाधिं (Ph.D) गृहीतुं स्नातकोत्तरोपाधे: अथ वा विशिष्टोपाधिना सहित: चतुर्वर्षीयस्य स्नातकविज्ञोपाधे: आवश्यकता भवेत्। एम. फिल् कार्यक्रमस्य समाप्तिर्भविष्यति।

## 3. शिक्षणाय अनूकूलपरिवेश-निर्माणम्
## (Creating a conductive learning environment)

---

**उद्देश्यम्** – आनन्दावह-गहन-प्रतिक्रियाशीलपाठ्यचर्यायाः सुनिश्चतीकरणं प्रभावि-रूचिपूर्णशिक्षाप्रविधीनाम्, छात्राणां च समग्रविकासे अनुकूल-अधिगमे च साहाय्यस्य सुनिश्चितीकरणम्।

---

लोकतन्त्रस्य सक्रियनागरिकत्वेन कस्मिंश्चिदपि च क्षेत्रे साफल्यसमन्वित-दक्षत्वेन युवजनान् सक्षमान् कर्तुं उच्चतरशिक्षायां पाठ्यचर्यया शिक्षाशास्त्रेण च तथ्यानां रटन्तप्रणालिभ्यः विदूरीकर्तुं प्रयतिष्यते।

क. स्पन्दितस्य गहनस्य च पाठ्यक्रमस्य विकासः राष्ट्रिय-उच्चतरशिक्षा-अर्हता-रूपरेखया निर्देक्ष्यते या विविधेषु क्षेत्रेषु विषयेषु च डिग्री/डिप्लोमेत्युपाधि/प्रमाणनमिति प्रस्तावितोपाधिना साकं शिक्षणप्रतिफलं प्रमाणयिष्यति। अकादमिकेषु दक्षतापूर्णेषु/व्यावसायिकेषु च क्षेत्रेषु तुल्यत्वं गतिशीलत्वं च सुनिश्चेतुं रूपरेखेयं राष्ट्रिय-कौशलार्हतायाः रूपरेखया समं संयोजयिष्यते।

ख. नम्रकं नवाचारं च अङ्गीकर्तुं CBCS इति विकल्पाधारित-प्रतिफल-व्यवस्था परिष्करिष्यते।

ग. प्रभावशालिशिक्षणपद्धत्या प्रेरकशिक्षणानुभवाः प्रस्तोष्यन्ते। सामाजिकसंलग्नतायै सर्वेभ्यः विद्यार्थिभ्यः सार्थकावसराः अपि प्रदास्यन्ते। न केवलं शैक्षणिकपक्षे प्रत्युत व्यापकासु क्षमतासु मनोवृत्तिषु चापि विद्यार्थिनां मूल्याङ्कनं करिष्यते।

घ. शोभनतरप्रतिफलं अवाप्तुं विद्यार्थिभ्यः शैक्षणिक-वित्तीय-भावनात्मकसाहाय्यं भवेत्।

ङ. मुक्त-दूरस्थाधिगमः विस्तारयिष्यते यः सकलनामांकनानुपातस्य प्रतिशतं पञ्चाशदङ्कपर्यन्तं वर्धयितुं महत्त्वाधायिभूमिकां प्रदर्शयिष्यति। ऑनलाइन-डिजिटल-कोषः, अनुसन्धानाय निधिः, शोभनतरछात्रसेवा, Moocs इत्यस्य अंकाधारितमान्यतासदृशाः उपायाः इति एतानि सुनिश्चेष्यन्ते यत् अयं अधिगमः उच्चतमगुणवत्तापूर्णकक्षाकार्यक्रमाणां तुल्यं भवेत् इति सुनिश्चेतष्यम्।

च. संस्थागतसंयुक्तोपक्रमैः विद्यार्थिनां संकायस्य च गतिशीलत्वेन च शिक्षायाः आन्ताराष्ट्रियीकरणाय सौविध्यं प्रदास्यते। आन्ताराष्ट्रियशिक्षायै चितभारतीयविश्वविद्यालयेषु एकम् अन्तर्विश्वविद्यालय-केन्द्रं स्थापयिष्यते।

## 4. ऊर्जस्वित:, समर्पित: संक्षमश्च संकाय:
## (Energized, engaged and capable faculty)

---

**उद्देश्यम्** - क्षम: प्रतिबद्ध: उत्कृष्टानुसन्धानाय ऊर्जस्वित: च अधिकारप्रदत्तसंकाय: (अधिकृत: संकाय:)

---

उच्चतरशिक्षासंस्थानानां साफल्याय तेषां सदस्यानां गुणा: समर्पणानि च अत्यावश्यकानि कारकाणि भवन्ति। नीतिरियं संकायसदस्यं उच्चतरशिक्षाकेन्द्रं प्रतिष्ठापयति।

क. प्रत्येकं संस्थायां पर्याप्तं संकासदस्या: भविष्यन्ति ये सुनेश्चेष्यन्ति यत् सर्वे कार्यक्रमा:, विषया:, उपादेयावश्यकताश्च पूर्णतां गच्छेयु:, वाञ्छनीया: विद्यार्थि-शिक्षकसमानुपाता: (30:1 त: नाधिकम्) संरक्षित: वैविध्यं च संधारितं स्यात्।

ख. तदर्थनियुक्तय: संविदानियुक्तयश्चेति प्रचलितोपागम: यथाशीघ्रं निस्सारणीय:/अपसारणीय: ।

ग. संकायसदस्यानां नियुक्ति: शैक्षणिकविशेषज्ञतायां, शिक्षणदक्षायां सार्वजनिकसेवामनोवृतौ चाधारिता भविष्यति।

घ. संकायसदस्येभ्य: यथोचितं परिकल्पिता स्थायिवृत्ति-कार्यानुसरणव्यवस्था प्रारप्स्यते- इयं हि 2030यावत् नैजसंस्थासहितासु सर्वासु संस्थासु सर्वथा क्रियान्विता करिष्यते।

ङ. संकायसदस्या:, पाठ्यक्रमनिर्माणाय पाठ्यचर्यात्मकविकल्प-निर्माणाय च सबलीकरिष्यन्ते। ते च शैक्षणिकस्वातन्त्र्येण साकमेव अनुसंधानकार्याणि अग्रे सारयिष्यन्ति।

च. सर्वाणि संस्थानानि संकायसदस्येभ्य: सततदक्षतासंवर्धन-परियोजनां एकां विकासयिष्यन्ति तस्याश्च कार्यान्वयनाय प्रक्रियां निर्धारयिष्यन्ति। परियोजनायामस्यां सम्बद्धक्षेत्रे/विषये क्षमतासंवर्धनम्, शिक्षणबोधसामर्थ्यम्, अभ्यासे अनुसंधानं योगदानञ्च समाविष्टा: भविष्यन्ति।

छ. संस्थागतविकासपरियोजनाया: संकायसदस्यानां नियुक्ति: विकासश्च, कार्यवृत्तावधौ प्रोन्नति:, क्षतिपूरणप्रबन्धनं च प्रत्येकं संस्थानानां अंगत्वेन भविष्यन्ति।

## 5. अधिकृतशासनसञ्चालनं स्वायत्तता च
**(Empowered governance and autonomy)**

---

**उद्देश्यम्** - समर्थेन नैतिकेन च नेतृत्वेन सार्धं स्वतन्त्राणि स्वशासितोच्चशिक्षणसंस्थानानि।

---

उच्चगुणवत्तापूर्णशिक्षानुसन्धानाय पोषणसंस्कृतौ बौद्धिक-ऊर्जस: आवश्यकता भवति- उच्चतरशिक्षासंस्थानानां शासनं संस्कृतिमिमां सुनिश्चिनोति।

क. उच्चतरशिक्षासंस्थानानि पूर्णशैक्षणिकप्रशासनिकस्वायत्ततया साकं स्वतन्त्रपरिषदा संचालयिष्यन्ते। परिषद: संघटनं नियुक्तिं च अध्यक्ष: कुलपति:/निदेशक: च सुनेश्चेष्यति यतो हि सर्वकारसहित: बाह्यहस्तक्षेप: विनश्येत् संस्थाश्च प्रति प्रतिबद्धतया साकं उच्चसामर्थ्ययुतानां जनानां नियुक्तय: सम्भवेयु:।

ख. सर्वा: उच्चशिक्षासंस्था: स्वायत्तस्वशासिसंस्थात्वेन सम्भवेत्। सम्बद्धताप्रथा च अवरोद्धव्या।

ग. नैजसंस्थानानि सार्वजनिकसंस्थाश्च नियामकशासनद्वारा समाना: स्वीकरिष्यन्ते। शिक्षाया: व्यवसायीकरणं समाप्तिं गच्छेत्, लोकोपकारिप्रयासाश्च प्रोत्साहयिष्यन्ते।

घ. स्वायत्तता व्यवस्थान्तर्गता कार्यशैल्यां संरचनायां तन्त्रे च समाहिता भविष्यति। संकायसान्निध्ये शैक्षणिकस्वतन्त्रता पाठ्यचर्याशक्तीकरणं च भविष्यति, ययो: शिक्षाशास्त्रीयोपगम: विद्यार्थिनां मूल्यांकनं शोधकार्यं च सम्मिलितानि भविष्यन्ति। संस्थाया: अधीने प्रशासनिक-शैक्षणिकस्वायत्तता: भविष्यन्ति। अस्यां कार्यक्रमाणामारम्भणं, कार्यक्रमसंचालनस्य स्वातन्त्र्यम्, पाठ्यचर्यानिर्धारणम्, विद्यार्थिक्षमतानिर्धारणं, संसाधनानाम् आवश्यकतानिर्धारणम्, आन्तरिकव्यवस्थाया: विकसनं च सम्मिलितानि सन्ति। अस्यामेव कार्यशासनसञ्चालनं जनप्रबन्धनम् च निहिते वर्तेते। उच्चतरशिक्षासंस्थानानि वस्तुत: स्वायत्त-स्वतन्त्र स्वशासिनिकायत्वेन विकासयिष्यन्ते।

## 6. नियामकव्यवस्थाया: रूपान्तरणम्
**(Transformation of the Regulatory System)**

---

**उद्देश्यम्-** उच्चतरशिक्षायां उत्कृष्टतां सार्वजनिकसेवाभावं च प्रोत्साहयितुं प्रभावि-सक्रिय-उत्तरदायिविनियमनम् सुशासनेन साकं सेवाभावं, समत्वं, उत्कृष्टतां, वित्तीयस्थिरताम्, सत्यनिष्ठतां च सुनिश्चेतुं विनियमनं उत्तरदायि अल्पतमात्मकं च भवेत्।

---

क. मानकनिर्धारणस्य, वित्तपोषणस्य, प्रत्यायनस्य, विनियमनस्य च कार्याणि पृथक् भविष्यति शक्तेश्च केन्द्रीकरणं हितानां च पारस्परिकसंघर्षम् अपसारयता स्वतन्त्रनिकायेन संचालयिष्यते।

ख. राष्ट्रियोच्चशिक्षानियामकप्राधिकरणमेव व्यावसायिकशिक्षासहितायै सम्पूर्णोच्चशिक्षायै एकमात्रं नियामकं भविष्यति। सर्वे प्रवर्तमाननियामकनिकाया: व्यावसायिकमानकनिर्धारकनिकायेषु रूपान्तरिता: भविष्यन्ति।

ग. प्रवर्तमान: विश्वविद्यालयानुदानायोग: उच्चतरशिक्षानुदानपरिषदि परिवर्तितो भविष्यति।

घ. सामान्यशिक्षापरिषद् स्थापयिष्यते, 'ग्रेजुएट् एट्रीब्यूट्स' इत्युक्ते उच्चशिक्षायै 'अपेक्षितशिक्षणप्रतिफलम्' परिभाषयितुं राष्ट्रियोच्चतरशिक्षाऽर्हताया: रूपरेखाया: विकास: करिष्यते।

ङ. आधारभूतमानकेषु प्रत्यायनविनियमनस्य आधार: निर्धारयिष्यते। राष्ट्रीयमूल्यांकनप्रत्यायनपरिषद् प्रत्यायनसंस्थानानां प्रकियाणां निभालनाय पारिस्थितिकीतन्त्रं विकासयिष्यति।

च. सार्वजनिक-नैज-उच्चतरशिक्षासंस्थाभ्य: एकं सामान्यनियामकतन्त्रं भविष्यति। नैजलोकोपकारिप्रयास: प्रोत्साहयिष्यते।

छ. उच्चतरशिक्षाया: राज्यविभागा: एकया नीत्या समावेक्ष्यन्ते, राज्योच्चशिक्षापरिषद: सहकर्मिसाहाय्यं सर्वोत्तमपद्धतिं च संविभाजयितुं सौविध्यं प्रदास्यन्ति।

# शिक्षक-शिक्षा

## 1. सुदृढं शिक्षक-सन्नद्धीकरणम्
**(Rigorous teacher preparation)**

---

**उद्देश्यम्** - शिक्षका: विषय-शिक्षणशास्त्रव्यवहारेषु गुणवत्तापूर्णं प्रशिक्षणं प्राप्नुयु: इति सुनिश्चेतुं शिक्षकाणां शिक्षाव्यवस्थां बहुविषयकै: महाविद्यालयै: विश्वविद्यालयै: च संयोज्य चतुर्वर्षीय: एकीकृत: स्नातकोपाधि: विद्यालयीयशिक्षकाणां कृते न्यूनतमयोग्यतारूपेण स्थापनीय:।

---

शिक्षणं नाम नीतिपरेण बौद्धिकरूपेण च अपेक्षान्विता वृत्ति: अस्ति। नूतना: शिक्षका: गहनं पूर्वाभ्यासं अपेक्षन्ते। ये शिक्षका: पूर्वमेव शिक्षायां वृत्तिपरा: तेऽपि दक्षताविकासम्, शैक्षणिकं व्यवसायात्मकं च साहाय्यम् अपेक्षन्ते।

क. शिक्षकाणां सज्जीकरणार्थं बहुविषयिकासु संस्थासु चतुर्वर्षीय: एकीकृत: शिक्षा-स्नातक-कार्यक्रम:, स्नातकाध्ययन-कार्यक्रमरूपेण विषय-क्षेत्रेषु शिक्षण-सन्नद्धीकरण-पाठ्यक्रमेषु चेति उभयथा प्रस्तोष्यते। स्तरविशिष्ट: विषयविशिष्ट: चायं कार्यक्रम:, शिक्षकान् कला-क्रीडा-व्यावसायिकशिक्षा:, आहोस्वित् विशेषशिक्षां प्रति केन्द्रितान् कृत्वा प्राग्विद्यालयत: माध्यमिकस्तरं (द्वादशकक्षां) यावत् सर्वविषयेषु सन्नद्धीकरिष्यति।

ख. चतुर्वर्षीय: शिक्षा-स्नातकोपाधि: अन्यै: स्नातकोपाधिभि: तुल्यो भविता, चतुर्वर्षीयं शिक्षास्नातकोपाधिं धारयन्त: विद्यार्थिन: च स्नातकोत्तरोपाधिपाठ्यक्रमे प्रवेष्टुम् अर्हा: भवितार:।

ग. प्रवर्तमान: द्विवर्षात्मक: शिक्षास्नातक-कार्यक्रम: 2030-वर्ष-पर्यन्तं प्रवर्तिता। 2030-वर्षात् परम्, केवलं ता: एव संस्था: या: चतुर्वर्षीयं शिक्षक-शिक्षा-कार्यक्रमं चालयन्ति, ता: एव द्विवर्षात्मकं कार्यक्रमं प्रवर्तयितुं शक्ष्यन्ति। ये जना: स्नातकोपाधिं धारयन्ति, तेषां कृते एव एते कार्यक्रमा: प्रवर्तयिष्यन्ते।

घ. 2030-वर्षस्य अनन्तरं कस्यचन अन्यप्रकारकस्य प्राक्सेवा-शिक्षक-सन्नद्धता-कार्यक्रमस्य प्रवर्तनं नैव विधास्यते।

ङ. शिक्षक-शिक्षां केवलं बहुविषयिका: संस्था: एव प्रदास्यन्ति। समुचितं प्राक्सेवा-शिक्षक-सज्जीकरणं गहन-सैद्धान्तिकावबोधार्थं शैक्षिक-परिप्रेक्ष्यस्य, विषयाणां शिक्षाशास्त्रस्य च प्रबोधेन साकं दृढतरयो: सिद्धान्त-व्यवहारयो: गम्भीरेषु सैद्धान्तिक-विषयेषु विशेषज्ञत्वम् आवश्यकं वर्तते-एतत् शिक्षाया: महत्त्वाधायि-क्षेत्रेषु विशेषज्ञानां विद्यालयानां च मिथ: व्यापक-समन्वयेन सार्धम् इतरेषु सर्वेषु विद्यालयीय-विषयेषु शृङ्खलोपलब्धिम् अपेक्षते।

च. निम्नस्तरीयाणि निष्क्रियाणि च शिक्षक-शिक्षण-संस्थानानि पिधास्यन्ते।

# व्यावसायिकी शिक्षा

## 1. उच्चशिक्षायां व्यावसायिक-शिक्षायाः पुनः एकीकरणम्, व्यावसायिक-शिक्षायाः पुनः पोषणम्। (Reintegrating professional education into higher education, Revitalizing professional education)

---

**उद्देश्यम्**- व्यावसायिक-शिक्षायाः उद्देश्यं समग्रतावादिनः उपागमस्य विरचनं यद्धि व्यापकाधारवतीनां दक्षतानाम्, एकविंश-शताब्दीय-स्तरानुसारेण आवश्यक-कौशलानां सामाजिक-मानवीय-सन्दर्भाणां च अवबोधेन दृढ-नैतिकादर्शेन च साकमेव उत्कृष्टं व्यावसायिक-क्षमतायाः विकासस्य सुनिश्चयीकरणम्।

---

व्यावसायिकानां सन्नद्धीकरणार्थं शिक्षायां नैतिकता-लोकप्रयोजनस्य महत्त्वम्, विषयः- क्षेत्रेऽस्मिन् शिक्षा-व्यवहारयोः कृते शिक्षा समाविष्टा स्यात्। एतदर्थं, व्यावसायिकी शिक्षा विशेषज्ञतायाः विलग्ना नैव स्यात्।

क. व्यावसायिकी शिक्षा समग्रायाः **उच्च-शिक्षा-व्यवस्थायाः अभिन्नाङ्गत्वेन** वर्तिता। केवलं प्राविधिकविश्वविद्यालयानां, स्वास्थ्य-विज्ञान-विश्वविद्यालयानां विधिविश्वविद्यालयानां कृषिविश्वविद्यालयानां च, आहोस्वित् एतेषु वा अन्येषु क्षेत्रेषु संस्थानां संस्थापनं पिधास्यते। सर्वाः संस्थाः, याः व्यावसायिकीं सामान्यां वा शिक्षां प्रददति, 2030-वर्षं यावत् उभयथा शिक्षा व्यवस्थित-रूपेण संस्थासु विकासनीया भविष्यति।

ख. **कृषिशिक्षा सम्बद्धविषयैः** साकमेव पुनर्जीविता विधास्यते। यद्यपि देशस्य सर्वेष्वपि विश्वविद्यालयेषु प्रायेण प्रतिशतं नवमिताः कृषिविश्वविद्यालयाः समाविष्टाः सन्ति, कृषौ सम्बद्धविज्ञानेषु च नामाङ्कनं हि उच्च-शिक्षायाः नामाङ्कनस्य प्रतिशतम् एकमिताद् न्यूनं वर्तते। कृष्युत्पादकतायाः क्षमतां गुणवत्तां च विवर्धयितुं समधिकदक्षाणां च स्नातकानां प्रविधिज्ञानां च, क्षमता गुणवत्ता च परिष्कृते स्याताम्। एवं हि, नूतनानुसन्धानेन विपण्याधृत-विस्तरेण च सम्बद्धानां प्राविधिकी-प्रथानां माध्यमेन कृष्युत्पादकतायाः संवर्धनार्थं परिष्कारहेतोः कृषेः सम्बद्धविषयाणां च क्षमता गुणवत्ता च परिष्कृते भवेताम्। सामान्यशिक्षया साकमेव एकीकृत-कार्यक्रमाणां माध्यमेन कृषिक्षेत्रे पशुचिकित्साक्षेत्रे च व्यावसायिकानां संवर्धनं जवीयस्या गत्या प्रवर्तिता। स्थानीय-ज्ञानं पारम्परिक-ज्ञानं चावगन्तुं उपयोग-क्षमतावतां व्यावसायिकानां विकासः, समेघमानानां प्रविधीनां, जटिल-विषयाणां संज्ञानाधानं यथा भूम्युत्पादकतायाः ह्रासः, जलवायुपरिवर्तनम्, अस्माकं समेधमानायै जनसंख्यायै खाद्यपर्याप्ततादीन् निध्याय, कृषिशिक्षायां पूर्णमपि प्रारूपं परिवर्तयिष्यते। कृषि-शिक्षा-प्रदायि-संस्थाः साक्षात् स्थानीय-समुदायान् लाभान्वितान्

विदध्यु: प्राविधिकं ज्ञानवृद्धिं प्रसारं च विवर्धयितुं कृषि-प्राविधिक-उद्यानानां संस्थापनं हि अन्यतमोपायत्वेन भविता।

ग. **विधि-शिक्षा**-कार्यक्रमा: पुन: संरचयिष्यन्ते। उत्तमोत्तमान् अभ्यासान् अङ्गीकृत्य, नूतनान् प्रविधीन् च समावेश्य न्यायं प्रति व्यापकाभिगम: स्यात्। सममेव काले एव न्यायोपलब्धये विधिषु व्यावसायिकी शिक्षा, विश्वस्तरे प्रतिस्पर्धिनी भवेत्। युगपदेव, इदं संसूचनीयं स्पष्टीकर्तव्यं च यत् न्यायस्य साम्विधानिक-मूल्यानि आलोकितानि स्यु:। आर्थिक-सामाजिक-राजनीतिक-लोकतन्त्रीय-साधनानां माध्यमेन वैधिका: मानवीया: च अधिकारा: राष्ट्रिय-पुनर्निर्माणं प्रति निर्दिष्टा: स्यु:। **विध्यध्ययनार्थं पाठ्यचर्या**, साक्ष्याधृतै: समुपायै: विधि-चिन्तनस्य इतिहासं, न्यायसिद्धान्तान्, न्यायशास्त्रीय-प्रक्रियाम् अन्यां सम्बद्धां सामग्रीं च सामाजिकै: सांस्कृतिकै: च सन्दर्भै: सह समुचितरीत्या पर्याप्तरूपेण च प्रतिबिम्बितां कुर्यात्।

विधि-शिक्षा-प्रदायिन्य: राज्यसंस्था: भाविनां अधिवक्तॄणां न्यायाधीशानां च कृते **द्विभाषि-शिक्षां** प्रवर्तयितुं विचारयेत्, या च आङ्ग्लभाषायां राज्यीयभाषायां च स्यात्, ययो: विध्यध्ययन-कार्यक्रम: संस्थित: वर्तते। एतच्च, अनुवादावश्यकताकारणात् वैधिकपरिणामावाप्तौ सञ्जायमानं विलम्बम् अपाकर्तुं वर्तते।

घ. **स्वास्थ्य-रक्षा-(हेल्थकेयर)**-शिक्षा तथा पुनर्विचारयिष्यते, यथा क्षेत्रेऽस्मिन् यावत्य: भूमिका: जना: निर्वहन्ति, तासाम् आवश्यकता: निध्याय शैक्षिक-कार्यक्रमाणाम् अवधि:, संरचना, अभिकल्पनं च निर्धारितानि भवेयु:। उदाहरणार्थं प्रत्येकमपि स्वास्थ्य-सेवा-प्रक्रियायै/ मध्यस्थतायै (उदाहरणार्थम् ईसीजी-इत्यादातुं पठितुं च) नैतद् आवश्यकं यत् अर्ह: चिकित्सक: एव अपेक्षित: भवेत्। सर्वेषाम् अपि एम्.बी.बी.एस्- स्नातकानां पार्श्वे : (i) चिकित्सा–कौशलम्, (ii) नैदानिक-कौशलम् (iii) शल्यचिकित्सीयकौशलम्, (iv) आपातकालीनं कौशलं च स्यु:। प्राथमिकोपचारेषु माध्यमिक-चिकित्सालयेषु च कार्यानुष्ठानार्थम् अपेक्षित-कौशलस्य कृते मुख्यरूपेण परिभाषितनिर्धारणानुसारेण विद्यार्थिन: नियमितान्तरालेन सम्यक्तया मूल्याङ्किता: भवितार:। एम्.बी.बी.एस्-पाठ्यक्रमस्य प्रथमवर्षे वा द्वितीयवर्षे सामान्यावधिरूपेण, सर्वेषामपि विज्ञानस्नातकानां कृते अभिकल्पयिष्यते, तत: परं ते एम्.बी.बी.एस्-बी.डी.एस्.-परिचर्या: (नर्सिंग) वा इतरविशेषज्ञता: प्राप्तुं अर्हितार:। परिचर्या-(नर्सिंग) दन्त्यचिकित्सा (डेन्टल)-आदय: अपि एम्.बी.बी.एस्-पाठयक्रमे अन्तर्भावयितुं पार्श्विकी प्रविष्टि: अनुमन्स्यते :- चिकित्सा–शिक्षार्हताया: रूपरेखा एतत्सौविध्यं प्रावधास्यति। नर्सिंग (परिचर्या)-शिक्षाया:

गुणवत्ता परिष्करिष्यते, परिचर्या (नर्सिंग)-इत्यस्याः अपरासाम् उपविषयधाराणां च कृते राष्ट्रियमान्यतानिकायः विनिर्मास्यते। अस्माकीनाः जनाः स्वास्थ्यसेवासु बहुलवादि-विकल्पानाम् उपयोगं कुर्वन्तीति कृत्वा चिन्त्यते यत् अस्मदीया स्वास्थ्य-शिक्षा-प्रणाली एकीकृता भवेत्। अस्य तात्पर्यमिदमेव यत् एलोपैथिक-चिकित्सा-शिक्षायाः सर्वेऽपि विद्यार्थिनः योगायुर्वेद-प्राकृतिक-चिकित्सायूनानी-सिद्ध-होम्योपैथीति-चिकित्सापद्धतीनां मौलिकपरिज्ञानं (आयुष) धारयेयुः। तथा चास्य विलोमतः अपि स्थितिः स्यात्। सर्वास्वपि स्वास्थ्य-सेवा-शिक्षासु निवारक-स्वास्थ्य-सेवायाः सामुदायिकौपधीनां च कृते अतितराम् अवधानं प्रदास्यते।

ङ. **प्रविधि-(तकनीकी)-**शिक्षा विशिष्टानि समाह्वनानि सम्मुखीकरोति यतो हि विषयोऽयं न च पूर्णतया ज्ञानाधृतोऽस्ति, न वा पूर्णरूपेण कौशलाधृतः। सर्वेऽपि मानवीयाः प्रयासाः प्राविधिक-विकासेन प्रभाविताः भवन्ति, प्राविधिकशिक्षायाः अन्येषां च विषयाणां मध्यगतः सम्बन्धः विनङ्क्ष्यतीति सम्भाव्यते। इतः परमपि, नैक-दशाब्देभ्यः न केवलं योग्यजनानाम् अपेक्षा एतेषु क्षेत्रेषु सततं प्रवर्तते, परञ्च नवाचारानुसंधानाभ्याम् उद्योगस्य संस्थानानां च मध्ये घनिष्ठ-सहयोगः अतिराम् अपेक्ष्यते। ते व्यवसायिनः, ये हि वर्तमान-भविष्ययोः कृते व्यवहारार्थं सम्यक्तया सन्नद्धाः सन्ति, ते आर्थिक-सामाजिक-पर्यावरणीयानां संदर्भाणां कृते उत्तरदायिपूर्णस्य समेधमानस्य विज्ञानस्य प्रविधेः च लाभान् अवाप्तुं क्षमन्ते। तेषां कृते आभियान्त्रिकी-प्राविधिकाः कार्यक्रमाः संशोधियिष्यन्ते। विद्यार्थिनः स्वीयं ज्ञानं विभिन्न-प्रकारकं च कौशलम् अनुप्रयोक्तुं क्षमेरन्, अथ च, अपरिचितान् अनुबन्धान् व्यावसायिक-प्रस्तावान् नैतिकतां च विकासयितुं पाठ्यचर्यायाः नवीनीकरणं भविता। आर्टिफिशियल्-इण्टेलिजैन्स् (कृत्रिममस्तिष्क)-बृहत्-डेटा-विश्लेषणादि-नूतनानि समेधमानानि विषयक्षेत्राणि आधृत्य कार्यनीतिकं बलं प्रदास्यते।

संस्थानानां प्रत्यायन-(रैन्किंग्)-उद्योगेन साकमेव सहयोगोऽपि प्रोत्साहयिष्यते, उद्योगानुभवेन सार्धं, संकायप्रशिशिक्षुत्वयोः (इन्टर्नशिप) अवसरादयः वर्धयिष्यन्ते।

**राष्ट्रियानुसन्धान-संस्थानम्**

## 1. गुणवत्तापूर्णस्य शैक्षिकानुसन्धानस्य प्रेरणम्।
## (Catalyzing Quality Academic Research)

---

**उद्देश्यम्** - अशेष-देशस्य सर्वेषु शैक्षिकविषयेषु अनुसन्धानस्य नवाचाराणां च प्रेरणं प्रोत्साहनं च, युगपदेव, विश्वविद्यालयेषु महाविद्यालयेषु च अनुसन्धानारम्भस्य तस्य विकासस्य च कृते विशेषावधानप्रदानम्। अपि चैतदर्थं वित्तपोषणहेतो: उच्चस्तरीय-सहकर्मि-समीक्षणेन, अनुप्रेरणेन (मेन्टरिंग) सहयोगेन च प्रेरकस्य पारिस्थितिकीतन्त्रस्य निर्माणम्।

---

अनुसन्धानं नवाचारश्च, बृहतीं जीवन्तीं चार्थ-व्यवस्थां विकासयितुं सन्धारयितुं च, समाजस्य उत्थानाय, समधिकोच्छ्रितता-प्रापणाय च राष्ट्रं प्रेरयितुं केन्द्रबिन्दुत्वेन वर्तते। अद्यत्वे जगति तीव्रतया सञ्जायमानं परिवर्तनं, जलवायुं, प्रविधिं, जनसंख्याया: गतिशीलताञ्च आधृत्य पूर्वापेक्षया दृढानुसन्धान-व्यवस्था अतितरां महत्त्वपूर्णा अनुष्ठेयास्ति।

क. संसद: अधिनियम-माध्यमेन भारतसर्वकारस्य स्वायत्त-निकायत्वेन राष्ट्रियानुसन्धान-प्रतिष्ठानं स्थापयिष्यते। अस्मै विंशति-सहस्त्र-कोटि-रुप्यकात्मकं (समग्रदेशाभ्यन्तरीणोत्पादनस्य (जीडीपी) प्रतिशतं शून्यदशमलवैकमितं) वार्षिकम् अनुदानं प्रदास्यते। एतच्च देशस्य गुणवत्तापूर्णानुसन्धानस्य क्षमतारूपेण आगामिदशाब्दं यावत् उत्तरोत्तरं विवर्धयिष्यते।

ख. प्रतिष्ठानस्य कार्यस्य प्राथमिकपरिधौ समावेक्ष्यन्ते-

- प्रतिस्पर्धा- 'पीयर'-समीक्षणाधृत-प्रक्रिया-माध्यमेन शैक्षणिक-परिदृश्ये सर्वेष्वपि विषयेषु अनुसन्धानार्थं वित्तपोषणं विधास्यते।
- सम्पूर्णेऽपि देशे शैक्षणिक-संस्थासु अनुसन्धानक्षमता निर्मास्यते।
- शोधकर्तॄणां सर्वकारस्य उद्योगानां च मध्ये लाभप्रदा: सम्बन्धा: विनिर्मेया:, येन हि, अत्यावश्यकान् राष्ट्रियविषयान् आधृत्य अनुसन्धानं स्यात्, तथा च जनहितार्थं नवीनतमानुसन्धानं सफलतया प्रवर्तेत चेति सुनिश्चितं स्यात्।
- विशिष्टपुरस्कार-संगोष्ठी-माध्यमेन उत्कृष्टानुसन्धानस्य अभिज्ञानम्।

ग. प्रतिष्ठानमिदम् आरम्भे प्रमुख-प्रभाग-चतुष्टयं धारयिष्यति-विज्ञानम्, प्रविधि:, सामाजिकविज्ञानम्, कला मानविकी च।

## अतिरिक्तानि प्रमुखध्येयक्षेत्राणि

## 1. शैक्षिकप्रविधिः
## (Education Technology)

---

**उद्देश्यम्**- शिक्षकाणां सन्नद्धीकरणस्य विकासस्य च समर्थनम्, शिक्षणाधिगमस्य मूल्याङ्कन-प्रक्रियायाः च परिष्कारः वञ्चितसमूहान् प्रति शिक्षाप्राप्तेः सुलभता, शैक्षिकयोजनायाः प्रबन्धनस्य च प्रक्रियायाः सरलीकरणेन प्रभावीकरणेन च सह शिक्षायाः सर्वेषु क्षेत्रेषु प्रविधेः समुचितम् एकीकरणं च।

---

अस्याः नीत्याः लक्ष्यम् एतद् द्रष्टव्यम् अस्ति यद् निम्नलिखितेभ्यः कार्येभ्यः प्रविधिः- शिक्षायाः सर्वेषु क्षेत्रेषु एकीकरणार्थम् इयं नीति : (i) शिक्षणे, अधिगमे, मूल्याङ्कनप्रक्रियासु च परिष्कारान् करोति (ii) शिक्षकाणां सन्नद्धीकरणस्य तेषां निरन्तरविकासस्य च समर्थनं करोति (iii) वञ्चितसमूहान् प्रति शिक्षायाः प्रापणं वर्धयति। (iv) शिक्षायोजनां, प्रशासनं प्रबन्धनं च समन्वयति।

क. प्रविधेः प्रयोगेण प्रेरणे, परिनियोजने, उपयोगे च निर्णयग्रहणस्य सुविधायाः प्रदानार्थं राष्ट्रियशैक्षिकप्रविधिमञ्चः (फोरम) इति एकस्य स्वायत्त-निकायस्य रूपेण स्थापयिष्यते। (निकायोऽयम्) शिक्षणसंस्थानानां, राज्यानां केन्द्रस्य च प्रशासनानां नेतृत्वस्य सन्नद्धीकरणम् अन्येषां हितधारकेभ्यः नवीनतमज्ञानेन अनुसंधानेन च सह अन्योन्यं प्रति सर्वोत्तम-पद्धतीनां परामर्शानां सहभागित्वस्य च अवसरान् उपलब्धान् कारयिष्यति।

ख. शैक्षिकप्रक्रियासु प्रविधेः एकीकरणम् (यथा अनुवादे सहायता, शैक्षणिकसहायतायाः रूपे कार्याणाम् अनुष्ठानं, सतत-व्यावसायिक-विकासः, अन्तर्जाले स्फुरत्पाठ्यक्रमादीनां (online) सौविध्यम्) अङ्कीयनिधानम्, शिक्षकसन्नद्धीकरणाय प्रविधेः उपयोगकरणं, योग्यसमर्थनस्य अनुसन्धानस्य च माध्यमेन अनुकूलितं विधास्यते। अनुसन्धानस्य प्रविधेः च समर्थनाय शैक्षिकप्रविधौ उत्कृष्टताकेन्द्राणि स्थापयिष्यन्ते।

ग. शैक्षिकप्रदत्तानां (Data) राष्ट्रियभण्डारसंस्थानं शिक्षकाणां विद्यार्थिनां च सर्वान् प्रलेखान् अङ्कीयरूपेण स्थापयिष्यति।

## 2. वृत्तिपरक-शिक्षा
**(Vocational Education)**

---

**उद्देश्यम्**- विद्यालयानां, महाविद्यालयानां, विश्वविद्यालयानां चेति सर्वाभि: शैक्षिकसंस्थाभि: सह व्यावसायिकशिक्षाया: एकीकरणम्। 2025-तमं वर्षं यावत् न्यूनतमा: प्रतिशतं पञ्चाशत् (50) विद्यार्थिन: व्यावसायिकशिक्षां प्राप्नुयु:।

---

भारतस्य जनसाङ्ख्यकीयलाभस्य पूर्णक्षमताम् अवाप्तुम् इयं नीति: न्यूनान्न्यूनं प्रतिशतं 50 विद्यार्थिभ्य: शिक्षाव्यवस्थाया: माध्यमेन कौशलविकासस्य प्रापणस्य लक्ष्यं निर्धारयति।

क. आगामिदशकं यावद् व्यावसायिक्या: शिक्षाया: एकीकरणं सर्वासु शिक्षासंस्थासु सोपानबद्धविधिना करिष्यते। कौशलान्तरालविश्लेषणानां स्थानीयावसराणां च चिह्नीकरणस्य आधारेण ध्येयक्षेत्राणां चयनं करिष्यते। व्यावसायिक्या: प्राविधिक्या: च शिक्षाया: एकीकरणाय राष्ट्रियसमिति: अस्य प्रयासस्य निरीक्षणं विधास्यति।

ख. शैक्षिकसंस्थानानां, प्राविधिकसंस्थानानाम् उद्योगानां च मध्ये सहयोगस्य माध्यमेन एकीकरणाय पृथक् कोषसंस्थापन-पूर्वकम् एतस्मिन् (एकीकरणे) परिवर्तनं करिष्यते।

ग. प्रत्येकं विषयक्षेत्राणां/व्यवसायानां/वृत्तीनां कृते राष्ट्रियकौशलार्हताया: रूपरेखा अग्रे विस्तृता भविष्यति। एतदतिरिच्य आन्ताराष्ट्रिय-श्रमिकसङ्घटनेन निर्मितानां व्यवसायानाम् आन्ताराष्ट्रियमानकानां वर्गीकरणेन सह भारतीयमानकानां सामञ्जस्यं करिष्यते। प्रारूपमेतत् **पूर्वाधिगमस्य मान्यतायै** आधारं प्रदास्यति। अस्य माध्यमेन औपचारिकव्यवस्थातो बहिश्च्युतानां प्रारूपे सम्बद्धस्तरेण सह तेषां व्यावहारिकम् अनुभवं संरेखितं कुर्वता तेषां पुन:स्थापनं करिष्यते। प्रारूपेऽस्मिन् सामान्यायां व्यावसायिक्यां च शिक्षायां गतिशीलताया: सौविध्यम् अपि प्रदास्यते।

घ. 2030-35 वर्षं यावद् व्यावसायिक्यां शिक्षायां स्नातकस्तरे नामाङ्कनस्य प्रतिशतं पञ्चाशत् (50) पर्यन्तं वर्धिष्यते। उच्चतरशिक्षासंस्था: स्वयम् अथवा उद्योगै: सह सहभागित्वपूर्वकं शिक्षाप्रदानं कर्तुमर्हन्ति।

ङ. उच्चतरशिक्षा-संस्थाभि: व्यावसायिक-शिक्षाया: प्रशिशिक्षुताया: च प्रदानाय प्रतिरूपाणां प्रयोगविधानम् अपि कर्तुं शक्ष्यते। उद्योगै: सह सहभागित्वे उच्चतर-शिक्षासंस्थानेषु तेज:संवर्धन-केन्द्राणि स्थापयिष्यन्ते।

1. भारते विकसितं ज्ञानं **'लोकविद्या'** विद्यार्थिभ्य: व्यावसायिक-शिक्षापाठ्यक्रमेषु एकीकरणस्य माध्यमेन सुलभायिष्यते।

## 3. प्रौढ-शिक्षा
### (Adult Education)

---

**उद्देश्यम्**- 2030-वर्षं यावद् युवसाक्षरताया: मात्राया: प्रौढ-साक्षरतायाश्च मात्राया: प्रतिशतं शतं (100) यावद् उन्नयनं, सततप्रौढशिक्षाया: कार्यक्रमस्य च पर्याप्तविस्तार:।

---

साक्षरता मूलभूतशिक्षा च वैयक्तिकं, नागरिकं, आर्थिकं जीवनपर्यन्तं च विद्याप्राप्ते: अवसराणां सहभागित्वं क्षमं कुरुत:- अयं च प्रत्येकं नागरिकस्य अधिकारोऽस्ति। तथापि अस्माकं युवजनसङ्ख्याया: प्रौढजनसङ्ख्याया: च एक: अस्वीकार्य: अंश: अधुना अपि निरक्षर: अस्ति।

क. प्रौढशिक्षायै राष्ट्रियपाठ्यचर्याया: प्रारूपं पञ्च व्यावसायिकक्षेत्राणि समावेष्टुं विकसिष्यते-मूलभूत- साक्षरता सङ्ख्याज्ञानं च, महत्त्वपूर्णजीवनकौशलम्, व्यावसायिककौशलम्, आधारभूतशिक्षा, सततशिक्षा च। अस्यां संरचनायां पाठ्यपुस्तकै: शिक्षणसामग्र्या च सह मूल्याङ्कनाय प्रमाणीकरणाय च मानदण्डस्य विकास: संयोजयिष्यते।

ख. राष्ट्रियप्रौढशिक्षानुशिक्षककार्यक्रमान्तर्गतं प्रौढशिक्षाया: प्रदानार्थं राष्ट्रियशिक्षाप्रशिक्षणकार्यक्रमस्य माध्यमेन प्रौढशिक्षा-केन्द्रस्य प्रबन्धकानां प्रशिक्षकाणां च एक: संवर्ग: रचयिष्यते, सममेव एकस्मै शिक्षार्थिने एक: प्रशिक्षक: इति नीतिपद्धत्या एकं बृहद्दलं रचयिष्यते।

ग. प्रतिभागिनाम् अभिज्ञानाय विद्यमानोपामस्य कार्यक्रमाणां च अन्तर्गतं सामुदायिकस्वयंसेवका: प्रोत्साहयिष्यन्ते- समुदायस्य प्रत्येकं साक्षरसदस्य: न्यूनान्न्यूनम् एकं जनं पाठयेत्-इति एका महत्त्वपूर्णा नीति: भविष्यति। बृहत्स्तरे जन-जागरूकता उत्पादयिष्यते। महिलानां साक्षरतायै विशेष: प्रयास: करिष्यते।

## 4. भारतीयभाषाप्रोन्नयनम्
## (Promotion of Indian Languages)

---

**उद्देश्यम्**- सर्वासां भारतीयभाषाणां संरक्षणस्य विकासस्य सञ्जीवनस्य च सुनिश्चितीकरणम्।

---

प्रत्येकं क्षेत्रस्य संस्कृते: परम्पराणां च उचितसमावेशस्य, विद्यालयेषु च सर्वेषां विद्यार्थिनां सम्यग्बोधस्य प्राप्ति: तदैव संभवा यदा हि जनजातीयभाषाभि: सह सर्वाभ्य: भारतीयभाषाभ्य: उपयुक्तसम्मानप्रदानं भवेत्। एवम् भारतस्य समृद्धभाषाणां साहित्यस्य च संरक्षणाय अयं पदक्षेप: अतीव महत्त्वपूर्ण: अस्ति।

क. अशेषदेशे सुदृढभारतीयभाषाणां साहित्यकार्यक्रमाणां च माध्यमेन अनुसन्धानकेन्द्रितशास्त्रीयभाषाणां संवर्धनं शिक्षकाणां सङ्कायसदस्यानां च नियोजनं करिष्यते। भारतीयभाषासु भाषा-साहित्य–वैज्ञानिक-शब्दावल्यां च अवधानं प्रदास्यते।

ख. शास्त्रीयभाषाणां साहित्यस्य च प्रोत्साहनाय विद्यमान-राष्ट्रिय-संस्थानानि दृढीकरिष्यन्ते, पाली-फ़ारसी-प्राकृत-भाषाणां एकं राष्ट्रियसंस्थानम् अपि स्थापयिष्यते।

ग. वैज्ञानिक-प्राविधिक-शब्दावल्यायोगस्य अयम् अधिदेश: अस्ति यत् सम्पूर्णदेशे एकरूपशब्दावल्या: विकासं कृत्वा अस्या: नवीनीकरणं विधातव्यम्, न च केवलं भौतिकविज्ञानानि अपितु सर्वाणि विषय-क्षेत्राणि विविधक्षेत्राणि च समावेश्य एतस्या: (एकरूपशब्दावल्या:) अधिक-विस्तार: करिष्यते।

# राष्ट्रिय-शिक्षा-आयोगः

## 1. रूपान्तरकारिणी शिक्षा- राष्ट्रियशिक्षा-आयोग:
## (Transforming Education:Rashtriya Shiksha Aayog)

---

**उद्देश्यम्**- नूतनस्य राष्ट्रिय-शिक्षा-आयोगस्य नेतृत्वे भारतीयशिक्षाव्यवस्थाया: दूरदृष्ट्या क्रियान्वयनम्, सर्वेषु स्तरेषु समानताप्रदानम्, उत्कृष्टताप्रदानम्, तारतम्यतापूर्वकं च कार्याणाम् अनुष्ठानदिशि वर्धनम्।

भारतीय-शिक्षा-व्यवस्थायै एकस्य प्रेरकनेतृत्वस्य आवश्यकता अस्ति येन हि निष्पादनस्य उत्कृष्टता अपि सुनिश्चेष्यते।

---

क. राष्ट्रिय-शिक्षा-आयोग: (द नैशनल एजुकेशन कमीशन इति) प्रधानमन्त्रिण: आध्यक्ष्ये शीर्षनिकायरूपेण सङ्घटयिष्यते।

ख. केन्द्रीय-शिक्षा-मन्त्री दैनन्दिन-विषयै: सह सम्बद्ध-प्रत्यक्ष-दायित्वै: सह उपाध्यक्ष: भविता।

ग. आयोगे प्रख्यात-शिक्षा-वेत्तार:, शोधकर्तार:, केन्द्रीयमन्त्रिण:, विभिन्न-राज्यानां मुख्यमन्त्रिणां प्रतिनिधय:, विभिन्न–क्षेत्राणां च व्यवसायिन: सम्मिलिता: भविष्यन्ति। आयोगस्य सर्वे सदस्या: उच्चविशेषज्ञा:, स्वक्षेत्रेषु च सार्वजनिक-योगदानेषु प्रमाणीभूता:, निर्दोषा:, सत्यनिष्ठा:, स्वतन्त्रा: च जना: भविष्यन्ति।

घ. आयोग: भारते शिक्षाया: संरक्षक: भविष्यति। आयोग: खलु अस्माकं समाजस्य विविधताया: पोषणं कुर्वन् शिक्षाया: एकीकृत-राष्ट्रिय-दूरदृष्टे: पुरोधा: भविष्यति। असौ राष्ट्रियस्तरेषु, राज्यस्तरेषु, संस्थागतस्तरेषु च समस्तै: सम्बद्धकार्यकर्तृभि: नेतृत्वकर्तृभिश्च सह प्रभाविन्या: सामञ्जस्यपूर्णाया: च समन्वितदृष्टे: क्रियान्वयनस्य सुविधां प्रदास्यति।

ङ. समन्वयं सामञ्जस्यं च सुनिश्चेतुम् आयोग: प्रत्येकं राज्येन सह मिलित्वा कार्याणि विधास्यति। शिक्षायै शीर्षस्तरीय-राज्यनिकायानां सङ्घटनं राज्यानि कर्तुं शक्नुवन्ति ये खलु राज्य-शिक्षा-आयोगा: (स्टेट्एजुकेशन-कमीशन इति) अभिधातुं शक्ष्यन्ते।

# शिक्षायाः वित्तपोषणम्

## 1. शिक्षाया: वित्तपोषणम्
**(Financing Education)**

क. इयं नीति: शैक्षिकनिवेशस्य वृद्ध्यै प्रतिबद्धा अस्ति, यतो हि शिक्षाया: लाभरूपेण समाजस्य भविष्यस्य कृते एतस्माद् भद्रतर: नहि कोऽपि निवेश: अस्ति, यत: शिक्षाया: लाभा: सम्पूर्णसमाजेन प्राप्यन्ते।

ख. अत: इयं शिक्षानीति: केन्द्रप्रशासनेन समस्तराज्यप्रशासनै: च शिक्षायां सार्वजनिकनिवेशे दशवर्षावधौ प्रतिशतं 20- मितायां वृद्धौ विचारं करोति।

ग. महत्वपूर्णघटकेभ्य:, यथा शिक्षणसंसाधनेभ्य:, विद्यार्थिसुरक्षा-कल्याणविषयेभ्य:, पोषणसम्बद्धसहायताया: सुनिश्चितीकरणाय सर्वप्रयासेभ्य:, पर्याप्तमानवसंसाधनेभ्य:, शिक्षक-विकासाय, वञ्चितसमूहेभ्य: प्रतिनिधित्वविहीनसमूहेभ्यश्च समानाया: उच्चगुणवत्तापूर्ण-शिक्षाया: सुनिश्चितीकरणाय वित्तीयसहायताविषये किमपि शैथिल्यं नैव स्वीकरिष्यते।

घ. इयं शिक्षानीति: शिक्षाक्षेत्रे नैजपरोपकारिणे क्रियाकलापाय नवीकरणं, सक्रियम् उन्नयनं, सहायतां च करोति। शैक्षिकप्रयासेभ्य: लाभेतरसम्पूर्णसेवाभाव-वित्तपोषणं विद्यमानसंस्थानानां जटिला: आवश्यकता: प्रति उन्मुखीकरिष्यते।

ङ. प्राथमिकव्ययम् अतिरिच्य मुख्यरूपेण मूलभूतसंरचनया संसाधनेन च सम्बद्धा इयं नीति: निम्नलिखितानां महत्त्वपूर्णक्षेत्राणाम् अभिज्ञानं करोति- (i) प्रारम्भिक-बाल्यावस्था-शिक्षाया: प्रसार: परिष्कार: च, (ii) आधारभूतसाक्षरताया: सङ्ख्याज्ञानस्य च सुनिश्चितीकरणम्, (iii) विद्यालयपरिसरेभ्य: पर्याप्तानि समुचितानि च संसाधनानि, (iv) भोजनं पोषणं च (अल्पाहार: मध्याह्नभोजनं च), (v) शिक्षक-शिक्षा-शिक्षकाणां च निरन्तरं कौशलविकास:, (vi) महाविद्यालयानां विश्वविद्यालयानां च पुनरुद्धार:, (vii) अनुसन्धानं च।

च. शासनं प्रबन्धनं च निधीनाम् उपयोगे सुचारुरूपेण, यथासमयम् उचितप्रवाहपूर्वकं सत्यनिष्ठया अवधानं दास्यत:। भूमिकाया: स्पष्टत्वेन पृथक्करणेन, सबलीकरणेन, संस्थाभ्य: स्वायत्तताप्रदानेन, नेतृत्वस्य भूमिकायां जनानां नियुक्त्या, प्रबुद्धनिरीक्षणेन च एतत् सम्भावयिष्यते।

छ. शिक्षाया: व्यवसायीकरणस्य विषय: बहुप्रासङ्गिकव्यूहेषु 'लघु किन्तु सुदृढम्' इति दृष्ट्या सार्वजनिकस्तरे पारदर्शिना उत्तमनियामकतन्त्रेण निर्मितनीत्या सार्वजनिकशिक्षायां पर्याप्तनिवेश:।

## 2. आगामि-पदक्षेप:
**(Way Forward)**

इयं नीति: समय-सीमायां विभिन्ननिकायानां नेतृत्वान्वितानां प्रमुख-कार्यानुष्ठानानां प्रारूपं निर्माति। शिक्षायां सम्मिलितेषु सर्वेषु निकायेषु योजनायां सामञ्जस्ये च सुसङ्गताया: माध्यमेन एतत् सुनिश्चेष्यते यत् नीतिरियं तस्या: मूलभावनया तदिच्छया च क्रियान्विता स्यात्।

मानवमात्रस्य प्रत्येकस्मिन् युगे ज्ञानं खलु पूर्ववंशानां सृजनस्य द्योतकम् अस्ति, तस्मिन् वर्तमानवंशेन स्वीययोगदानं क्रियते।

मोबियस् स्ट्रिप इति ज्यामितीयधरातलस्य मूलभाव: खलु ज्ञानस्य निरन्तरं विकाशील-चेतना च तादृशी प्रकृतिरस्ति यस्य नैवास्ति आदि न चान्त:।

नीतिरियं सातत्यस्य अङ्गरूपेण ज्ञानस्य सृजनस्य, सञ्चरणस्य, उपयोगस्य, प्रसारस्य च परिकल्पनां करोति या हि सातत्यस्य अङ्गभूता अस्ति।